रङ्गवीथिः

(संस्कृतनाट्यत्रयम्)

डॉ. कीर्तिवल्लभशक्टा 'शाकटायनः'

(आवरणचित्रम्)

चम्पावतजनपदस्य सुमनोहरं चित्रम्, चिह्निते सम्भागे घटोत्कचमन्दिरं विद्यते, परितः विराजमाना वनराजिः आवर्षं हरितावलिभिः मोहयति मनः।

श्रद्धेय डॉ० पाठक जी को
सादर समर्पित
कमलेश:

पं. ताराकरस्मृतिमालायां पञ्चमं पुष्पम्

रङ्गवीथिः

(संस्कृतनाट्यत्रयम्)

रचयिता

डॉ. कीर्तिवल्लभशक्टा 'शाकटायनः'

शारदाज्योतिर्भवनम्, चम्पावत

(उत्तराखण्ड)-२६२५२३

This publication has been brought out with the financial assistance from the Rastriya Sanskrit Sansthan, New Delhi.

प्रकाशक डॉ० कीर्ति वल्लभ शक्टा
शारदाज्योतिर्भवनम्
निकट–एम. इ. एस.–कैम्प
चम्पावत, उत्तराखण्ड, पिन – 262523
दूरभाष – 0595230256
ईमेल – kvshakta@gmail.com

ISBN :- 978-81-908700-0-9

प्रथम-संस्करणम्-संवत् - 2066

मूल्यम् - रूपये 51/

आवरणम् - पॉल प्रिन्टोग्रॉफिक्स
शब्दसंयोजक - श्रीसुधीरकुमारझा
मोबाइल 9968292361

मुद्रक - गणेश प्रिन्टिंग प्रेस
कटवारिया सराय, नई दिल्ली-16

प्रो. वाचस्पति उपाध्यायः
कुलपतिः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानित-विश्वविद्यालयः) नव देहली

नैवेद्यम्

विदितमेव विपश्चित्सु यत्काव्यकलायां लोकवृत्तानुकरणस्य नाट्यस्य नितान्तं व्यापकं प्रयोजनं भवतीति। तद्धि लोकहृदयमनुवर्तते, लोकहृदयञ्च न सदैव एकरसमालोक्यते, रुचिभेदात्कदाचिदौदार्ये कदाचित्कार्पण्ये, सौजन्ये कदाचिद्दौर्जन्ये च रममाणमाप्यते। संस्कृतरूपकं निसर्गतो विशुद्धस्य हृदयस्य कर्मसंस्कारजन्यां मलिनतामपनेतुं तादृशीं सामग्रीमुपयुनक्ति, यादृश्या लोकस्य मङ्गलसमीहितं सिद्ध्येत्। अतस्तत्र विदग्धैर्महनीयचरितानि न्यधीयन्त, मानसकालुष्यापनयनं हि सतां चरितानुसन्धानेन सञ्जायते। संस्कृतरूपके रसोद्रेकदिशि संस्कृतसमालोचकेषु नितरामभिनिवेशोऽवलोक्यते अतो यथा रससाधनार्थमपेक्षिततत्त्वानां समावेशो विधीयते न तथा कथावस्तुचरित्र-चित्रणादिषु न गौरवधीराधीयते तथापि संस्कृतनाट्यकारो मर्यादां पोषयितुं संसारस्यासीमवैचित्र्यानुभूतिमालम्ब्य स्वकीयानि पात्राणि घटयति, न स तानि व्यक्तित्ववैशिष्ट्याद् यथार्थजीवनाच्च संस्रयति। तदीयं परम्परागतमपि पात्रं न कदापि वैरस्यं जनयति, न च कल्पनालोकस्यैव तत्पात्रं भवति, तद्भवति भूतलस्यैव प्राणवान् मानवः। अतश्च लोकमनोरञ्जनपुरस्सरं सामाजिकेषु गुणाधानं दोषापनयनमेव लक्ष्यीकृत्यानुष्ठितस्य नाट्याख्यस्य शान्तस्य चाक्षुषक्रतोः युक्तं फलं निर्दिशति कविकुलगुरुः -

त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्॥

अधुनातनसंस्कृतरचनाकारेष्वपि केचनैवंविधसृष्टावभिनिविशन्ते, तत्र देवभूम्युत्तराखण्डे लब्धजनुषां विद्वत्प्रवराणां डॉ. कीर्तिवल्लभशक्ता-महोदयानामियं लघुकलेवरापि भव्यभावनिर्भरा सरसभाषाबन्धुरा च नाटकत्रयी प्राकाश्यमानीयत इति विज्ञाय महान्तं तोषमनुभवामि। अत्रापि

महाभारतीयवृत्तमाश्रित्य मनोज्ञरीत्या मनोऽभिरामाभिनयः समुपपाद्यते, यश्च सार्वजनीनसंस्कृतेः प्रचारकस्य रचयितुः कलानुरागितां प्रकाशयन् उत्कृष्टतां निदधाति। अनासक्तिविभाविता पुरुषार्थलसिता वरिवस्या समन्वयकारिणी मनीषा च भारतीयसंस्कृतेर्मेरुदण्डः। स्वकृतिषु प्रीतिपूर्वकं तत्प्रतिपादनं विविधपरिस्थितिवीचिवक्षसि तरन्तीं मानवमानसगतिं चित्रयन् कविरयं साम्प्रतिकसमस्यासमाधाने जागरूको लक्ष्यते। नात्र केवलं पवित्रप्रणयस्य निरवद्या आभा एव स्फुटं परिलक्ष्यते अपितु देवसंवादसरण्या विविध-समुदायसामरस्येन संसारस्य शुभमीक्ष्यते। भाषासारल्येन वर्णनवैशद्येन वस्तुनां चारुसन्निवेशेन च कविवरो नूनं साफल्यश्रीसौभाग्यमुपभुनक्ति, तरलयति च त्रिपथगाथामिव नाटकत्रय्यां लोकमानसं निमज्जयन्, प्रवलयति अभिनवसंस्कृत- रचनाप्रवाहम्, स्वस्तिवाचनं च करोति लोकस्य स्वानवद्यसाम्ग्र्या।

तदीयं युक्तरूपमायासमिमं तदीयेनैव वचसा संस्तौमि-

भवतु तव प्रयासः सर्वथा पुण्यकारी
जगदहितविनाशी सर्वदा पापहारी।
विबुधजन-विहारी लोक-कल्याणकारी
त्रिभुवन-सहकारी काम्यते धर्मचारी।।

सम्प्रार्थये च भगवतीं भारतीमेतत्कविवरमानसं स्वविपञ्चीक्वाणस्फुरितया ललितप्रबन्धसामर्थ्यश्रियापूरयितुमिति।

शुभानुध्यायी
(प्रो. वाचस्पति उपाध्यायः)

किञ्चिन्निवेदनम्

देवो यो वसते सदा प्रमुदितः श्रीनागनाथान्तिके
पूर्वं यो मम पूर्वजैः सुविधिना सम्पूजितः श्रद्धया।
भक्तेभ्यो विदधाति वाञ्छितफलं यः सर्वदाता भुवि
वन्दे तं कुलदैवतं गुणनिधिं नागार्जुनं शंकरम्॥

बहोः कालात् पूर्वं मम पूर्वजाः मयराष्ट्रात् अत्र कूर्माचले समागत्य भगवन्तं नागार्जुनं शिवं समाराध्य संस्कृतभाषायाः प्रचारे-प्रसारे च दत्तचित्ताः अभूवन् मन्ये तेषामनुकम्पया इदानीं मन्दबुद्धिरहं "बालचर-सेवा, भारते भाति भारती, घटोत्कच-वनम्" इति नाट्यत्रयान्वितं "रङ्गवीथिः" नाम्ना विभूषितं लघुग्रन्थं विदुषां करकमलेषु समर्पयन् प्रफुल्लहृदयोऽस्मि।

एषु नाट्येषु बालचर-सेवा, भारते भाति भारतीति नाटके दिल्लीसंस्कृत- अकादम्याः अखिलभारतीयप्रतियोगितायाः माध्यमेन पुरस्कृते। घटोत्कच-वनम् इति नाटकं मया महाभारतात् स्कन्दपुराणस्य मानसखण्डाच्चानुसृत्य विरचितम्, चिन्तयामि नाटकमिदं नूनं सहृदयानां मनांसि आह्लादयिष्यति।

वस्तुतः क्षेत्रदेवस्य घटोत्कचस्य मयि महती कृपा आसीत्। युवावस्थायामहमेकदा उदररोगेण पीडितः सन् घटोत्कचमन्दिरस्य नातिदूरे यजमानस्य वरयात्रातः गृहं प्रत्यागच्छन् आसम्। तदानीं मया घटोत्कचाय प्रार्थना कृता हे घटोत्कच! अद्याहं नद्यां कूर्दनं कृत्वा स्व प्राणान् त्यक्तुकामोऽस्मि। यदि मम उदररोगस्य निरसनं सम्भवं चेत् तर्हि भवान् माम् रक्षतु अथवा न। इतः पूर्वं मया व्याधेः बहुचिकित्सा कारिताऽऽसीत् परं कोऽपि लाभो नाभवत्।

अतो घटोत्कचं सम्प्रार्थ्य आत्महत्यार्थं दृढनिश्चयं कृत्वा यदाहं गण्डकीनद्याः सेतुं समागत्य नद्यां कूर्दनाय तत्परः आसं तदा केनापि वारितः रे मूर्ख! किं करोषि स्वप्राणान् एवं त्यक्तुमिच्छसि महत्पापमिदं शीघ्रम् इतः गृहं गच्छ। एकवारं न अपितु कतिपयवारम् ईदृशमभवत्। इत्थम् अन्ततः जनैः अहं गृहं प्रत्यावर्तितः। कालान्तरे व्याधेः चिकित्साऽपि सञ्जाता।

अतो तद्दिवसं संस्मृत्य मया हिन्दीभाषायां **'संसर्ग-सुमन'** इति खण्डकाव्यमाध्यमेन हिडिम्बाभीमयोः प्रेमान्विता रचना प्रकाशिता, संस्कृतभाषामाध्यमेन **'घटोत्कच-वनम्'** इति नाटकं विरचितम्।

अत्र कूर्माचले कैलास-मानस-सरोवरयात्रायाः मार्गे चम्पावतीतः नातिदूरे कूर्माचलीय गण्डक्याः नद्याः समीपे अधुनापि विराजते भीमसूनोः घटोत्कचस्य वनं मन्दिरञ्च। स्कान्देऽस्य विशदं वर्णनमस्ति। अत्रैव मानसेयनामधेयकः पर्वतादि विद्यते यत्र मानस-सरोवरात्-निर्गतं जलं भूमेः गुप्तमार्गात् अत्रागत्य भगवतो मानसेश्वरस्य अभिषेकं करोति। पुराणानुसारेण इत एव मानससरोवरस्य सीमा प्रारभते। अस्य माहात्म्ये व्यासेन लिखितम् -

तत्र ये मानसीये वै जले स्नात्वा द्विजोत्तमाः।
सम्पूजयन्ति देवेशं मुक्तिं विन्दन्ति ते सदा॥
समातृकं भीमसुतं सम्भाव्य मुनिसत्तमाः।
मानसेयं हरं ये वै पूजयन्ति समाहिताः॥
भुक्त्वा भोगान् सुविपुलान् शिवं यान्ति परत्र वै।

खल्वयं क्षेत्रदेवः अत्रत्यानां जनानां विविधप्रकारेण उपकारं करोति, प्रायः अत्रत्याः सर्वे जनाः गृहे सम्पाद्यमानस्य उत्सवस्य दिवसे विघ्नवारणाय अस्य कृते पञ्चदीपान् निशामुखे प्रज्वालयन्ति। झञ्झावातस्य वारणाय देवोऽयं निश्चप्रचेन सहायको भवति। विचारयामि अनेन नाटकेन सह कूर्माचलस्य माहात्म्यमपि जनैः लोके ज्ञातुं शक्यते।

वस्तुतः इदं मम महत्सौभाग्यं यत् ग्रन्थस्य साफल्यार्थं संस्कृतजगति

भानुरिव देदीप्यमानैः विद्वत्वर्य्यैः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिः प्रो. वाचस्पति उपाध्यायमहाभागैः स्वकीयैः प्रास्ताविकेन सह मदर्थे भूरिशः शुभाशंसा प्रदत्ता अतोऽहं तेषां महाभागानां दिव्यस्वरूपं मनसि निधाय सततं प्रणमामि, तेषां प्रति स्वकीयां कृतज्ञतां च प्रकटी करोमि।

अस्मिन् पर्वणि श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य शोधविभागाध्यक्षमहाभागानां सुरभारत्याः परमसेवकानामशेषविद्यानिधीनां प्रो. रमेशकुमारपाण्डेयमहाभागानामुपकारान्मनसि ध्यायन्ध्यायन्तेषां प्रति सश्रद्धया नतेन शिरसा प्रणम्य पौनः पुन्येन कृतज्ञतां प्रकटयामि।

अस्मिन्नेव सन्दर्भे संस्कृतव्याकरणजगति लब्धयशषां श्रीलालबहादुर-शास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य व्याकरणविभागस्य आचार्याणां प्रो. जयकान्तसिंहशर्ममहाभागानां कृते स्वकीयम् आभारं प्रकटयामि मन्ये तेषां साहाय्यं विना तु अस्य ग्रन्थस्य प्रकाशनं सर्वथा असम्भवः आसीत्। अतः तेषां कार्तज्ञं शिरसा वहामि।

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य विदुषां डॉ. भागीरथीनन्दः, डॉ. सुन्दरनारायण झा, डॉ. ज्ञानधरपाठकमहाभागानां स्मृतिः अस्मिन् पर्वणि मदर्थे परमावश्यकं यत्तैः वारं-वारं ग्रन्थस्य प्रकाशनार्थं स्वकीयं साहाय्यं प्रदत्तम्।

अत्राहं स्वात्मजाय चि. कमलेशाय प्रति साधुवादं वितरन्सन्तोषमनुभवामि यत्तेनापि कार्येऽस्मिन् मम सर्वविधसाहाय्यं कृतम्।

अस्तु गणेशप्रिंटिंगप्रेसस्य प्रबन्धकमहाभागानामपि आभारं प्रकटयामि यत्तेषां कृपया ग्रन्थोऽयं प्रकाशितः। अस्मिन्नेव सन्दर्भे नूनमहं श्रीमत्पं. सुधीरकुमारझामहाभागानां स्मरणं कर्तुं न विस्मरामि। यतो हि अनेन महाभागेन समर्पितभावनया संगणके ग्रन्थं विलिख्य मम साहाय्यं कृतम् अतः तेभ्यः धन्यवादं वितरन् कार्तज्ञं स्वीकरोमि।

ग्रन्थस्य प्रकाशनार्थं मया राष्ट्रियसंस्कृतसंस्थानस्य निदेशकमहाभागाय

सम्प्रार्थना कृता। अर्थसाहाय्यं प्राप्य निदेशकमहाभागानां तत्रत्यानां सर्वेषां महानुभावानां कृतज्ञोऽस्मि।

अन्ते सर्वान् सुधीजनान् प्रणम्य प्रार्थयामि। नाहं विषय-विशेषज्ञः न च वैय्याकरणः न च दार्शनिकः केवलम् आत्मसुखाय कदाचित् कवितां कदाचित् नाटकं कथां वा लिखामि। अस्मिन् ग्रन्थे प्रकाशितेषु नाटकेष्वपि बहवो त्रुटयः स्युः, अतः पुस्तकं पठित्वा मामवबोधयन्तु अनेन भविष्ये तान् संशोध्य पुनः प्रकाशने सौकर्यं भविष्यति। आशासे भवन्तः मम प्रयासं स्वीकृत्य मह्यं नूतनां प्रेरणां प्रदास्यन्तीति निवेदनेन सह।

विदुषां चरणकमलचञ्चरीकः

कीर्तिवल्लभ शक्टा

बालचर-सेवा

(प्रथमं दृश्यम्)

[**स्थानम्** - कस्यचिद् उत्तरमाध्यमिकविद्यालयस्य प्राङ्गणम्। पङ्क्तिबद्धाः बालचराः, अत्र बालचर-कमिश्नरः (बालचरशिक्षकः) उपदिशति]

स्काउट-कमिश्नरः (बालचर-शिक्षकः)-भोः बालचराः! भवन्तः सर्वे जानन्ति श्वः प्रभाते सूर्यग्रहणं भविता। तदुपलक्ष्ये अस्माकं ग्रामस्य निकटे गङ्गायाः कूले अद्य रात्रौ गङ्गास्नानस्य मेलापकं भविष्यति। सुदूरेभ्यः प्रान्तेभ्यः आबालवृद्धाः नराः नार्यश्चात्र प्रतिवर्षमिव स्नानार्थं ग्रामस्य नातिदूरे घट्टे समागमिष्यन्ति। भवद्भिः तेषां सेवार्थं बद्धपरिकरैः भवितव्यम्। मेलापकक्षेत्रे बालचरशिविरे भवतां निवासस्य व्यवस्था भविष्यति। येषां बालचराणां गृहाणि मेलापकक्षेत्रस्य निकटानि सन्ति ते अर्द्धरात्रेः परं गृहं गन्तुं समर्थाः भविष्यन्ति, अपरे शिविरे एव यथाक्रमेण सेवया सह विश्रामं करिष्यन्ति।

रमेशः- श्रीमन्! मम गृहं त्वितः क्रोशत्रयं वर्तते। इदानीं मम भगिन्याः स्वास्थ्यम् असमीचीनं विद्यते। अतः अहम् अर्द्धरात्रेः परं द्विचक्रिकायाः माध्यमेन गृहं गमिष्यामि एतदर्थं भवन्तं प्रार्थयामि।

स्काउट-कमिश्नरः- अनुमतिर्दीयते। परं भवता रात्रौ सावधानतया तत्र गन्तव्यम्।

(सभायाः विसर्जनम्, इति प्रथमं दृश्यम्)

(द्वितीयं दृश्यम्)

एकेन ग्रामीणेन सह बालचरः रमेशः द्विचक्रिकामारुह्य ग्रामं प्रति गच्छति। अग्रे-अग्रे ग्रामीणस्य द्विचक्रिका धावति तदनु रमेशस्य, गाढान्धकारा रात्रिः वर्तते। यदा रमेशः सेतोः मध्यभागमाप्नोति तस्य

(तृतीयं दृश्यम्)

(मेलापके बालचरशिविरम्)

स्काउट-कमिश्नरः - भो रमेश! किं भवान् स्वभगिन्याः उपचारार्थं गृहं न गतः?

रमेशः - श्रीमन्! यदाहं इतः क्रोशमेकं गतस्तदा तत्र मया नद्यास्तटे आर्तरवः श्रुतः। कथं-कथमपि मया तत्र गत्वा दृष्टः यत् सद्यः कोऽपि जनः सेतोः उपरिभागात् भूमौ नद्यास्तटे पतितः। पतनेन तस्य शिरः प्रदेशे क्षतम् अभवत्। मम तत्र गमनात्पूर्वं स अचेतनत्वं गतः। तस्य शिरसि रक्तस्रावं वीक्ष्य मया स्व-विवेकेन उपचाराः कृताः परं सर्वा क्रिया निष्फला जाता। केनापि प्रकारेण वन्यपशुभ्यः रक्षणाय तत्र अग्निं प्रज्वाल्य इहागतोऽस्मि, तस्य रक्षार्थं भवन्तं सूचयामि।

कमिश्नरः - साधु, साधु रमेश! भवता बालचरानुरूपं समुचितं कृतम् (इति कथयित्वा सः ध्वनिसङ्केतं करोति, (श्रुतमात्रेण सर्वे बालचराः तत्र समुपस्थिताः भवन्ति)

दशसङ्ख्यकाः बालचराः रमेशेन सह गच्छन्तु तम् आहतं शीघ्रं चिकित्सालये आनयन्तु।

(पटाक्षेपः)

(नेपथ्ये बालचराणां गमनागमनध्वनिः श्रूयते, इति तृतीयं दृश्यम्)

(चतुर्थं दृश्यम्)

(**स्थानम्** - मेलापके चिकित्साशिविरम्। शिविरस्य बहिर्भागे पङ्क्तिबद्धाः केचन बालचराः बालचरकमिश्नरश्च। चिकित्सकः आहतस्य चिकित्सां कृत्वा प्रसन्नः सन् बहिरायाति)

कमिश्नरः - चिकित्सकमहाभागाः। कीदृशः वर्तते इदानीमाहतस्य स्वास्थ्यम्?

चिकित्सकः - बालचराणां कृपया इदानीम् आहतस्य चिकित्सायां लेशमात्रोऽपि विलम्बः अभविष्यत् तर्हि सर्वथा असम्भवाऽऽसीद् अस्य प्राणानां सुरक्षा, अत्र सर्वे बालचराः प्रशंसनीयाः, विशेषेण रमेशस्य कार्यं तु अतिश्लाघनीयः येन गहनान्धकारे निर्भयेण प्राणार्पणेनापि आहतस्य रक्षा कृता।

जयन्तु जगति बालचराः

(पटाक्षेपः)

[इति कीर्तिवल्लभ 'शाकटायनेति' कविना विरचिता 'बालचरसेवा-नामधेया' एकांकी समाप्ता]

भारते भाति भारती

समग्रं भारतवर्षं दीपालोकेन अनेकशः आधुनिक-पटाखादीनां विविधवर्णमयविद्युद्दीपानां (मोमबत्ती) मधूच्छिष्टवर्तिकानां प्रकाशेन चेत्थं चकास्ते यत् तैः प्रस्फुटिता अनुपमाभा नाकं प्राप्य सुरगणानपि द्योतते स्म। प्रसन्नानना लक्ष्मीः विष्णुं विहाय उलूकमारुह्य भारतं प्रति प्रचलिता, मन्ये अर्धाङ्गिनीं विना खिन्नमानसो विष्णुः क्षीरसागरात् मनोविनोदाय स्वर्लोकं गतः। तदानीं सर्वे देवाः सुखभोगरताः स्वर्गवासिनः भारतवर्षे प्रज्वालितानां दीपानां सुलौकिकप्रकाशस्य विस्फारिताक्षिभिः निरीक्षणरता आसन्। अस्मिन्नेव क्षणे अप्रत्याशितभावनया समागतं नारायणं विलोक्य सर्वे इन्द्राद्याः दिवौकसः परमाश्चर्यं जग्मुः। स्वागतान्ते तैस्सर्वैः मिलित्वा एका सभाऽकारिता, सभायाः अध्यक्षता स्वयमेव विष्णुना कृता। अत्रामरैः नारायणं विविधसमस्यात्मकाः प्रश्नाः पृष्टाः।

नारदः - भगवन्! अहं स्वभावतः ब्रह्माण्डस्य विविधलोकेषु पर्यटन् मर्त्यलोकेऽपि गतवान्। तत्र मया दृष्टं यत् साम्प्रतं वसुन्धरायां प्राक्तनाः विषूचिकादयः महारोगाः न सन्ति, किमत्र कारणम्?

यमः - आम् श्रीमन्! मम गृहे सर्वे रौरवाद्याः नरकास्तु पापैः परिपूर्णाः सन्ति, परन्तु विषूचिकादयः महारोगाः ये परस्सहस्रमनुष्याणां संहारका आसन् ते अत्यन्तं दुर्बलाः बुभुक्षिताः इव प्रतीयन्ते। आम् न जाने कुतः अभिनवा एड्सादयः महारोगाः अत्रागताः येन अत्रत्याः रोगाः एव न अपितु मम संरक्षकाः भयावहाः दूताश्च भयापन्नाः भीतभीताः दृश्यन्ते।

विष्णुः - वत्स! श्रुतं मया तत्र पृथिव्यां मानवेन महती वैज्ञानिकी उन्नतिः कृता, अतएव तत्र स्वर्लोकस्य सकलं सुखं सहजमेव समवाप्यते। प्रसङ्गेऽस्मिन् इदमपि सुनिश्चितं यद् अधुना तैः चिकित्सापद्धतिः अपि सुदृढीकृता येन महारोगाः स्व-पराक्रमं प्रदर्शयितुं निश्चयेन असमर्थाः जाताः।

चित्रगुप्तः – प्रभो! एड्सादीनां रोगविशेषाणां नामोल्लेखस्तु अस्माकं शब्दकोषे नास्ति परं ते बलादत्रागत्य अस्माकं कार्ये अवरोधं कुर्वन्ति।

ब्रह्मा – यावदहं चिन्तयामि अत्र खलु मानव एव अस्य रोगस्य कारणम्, सत्यमिदं यत् अप्राकृतिकसुखभोगः अमर्यादितमार्गश्च समेषां पतनस्य योगः।

विष्णुः – नन्वागमनिर्दिष्टो मार्ग एव जनानां कृते सुखकरो वर्तते। चिन्तयामि वस्तुतः सम्प्रति वैज्ञानिकी समुन्नतिः पृथिव्यां महदानन्ददायिनी वर्तते परं तस्यापरपक्षः विनाशाय प्रतीयते अतो मानवैः वैज्ञानिकैश्चात्र प्रथमं पक्षमनुसृत्याभिनवा प्रयोगाः विधातव्याः।

यमः – प्रभो! सत्यमेव अधुना पृथिव्यां वैज्ञानिकी उन्नतिः अनुदिनं वर्धमानास्ति। शिशूनां जन्मविषये तु अनेन विधिना सृष्टिरपि पराजिता। यतो हि –

विधिना लिखितं भाले यस्य सन्ततिसप्तकम्।
नियोजनप्रभावेण प्राप्नोति स शिशुद्वयम्॥
यस्याङ्के सन्ततिर्नास्ति न च सम्भावना क्वचित्।
परीक्षणनलीं प्राप्य पुत्रलाभाय कल्पते॥

विष्णुः – भो देवाः! अत्राश्चर्यं न कर्तव्यम्। युगेऽस्मिन् मानवः यादृशीं साधनां साधयति शीघ्रं हि तादृशी सिद्धिः प्रभवति। धरायां साम्प्रतं या काऽपि वैज्ञानिकी उन्नतिः दृश्यते तस्याः आधारस्तु प्राक्तनानि सूत्राण्येव। समग्रेषु वेदेषु पुराणेषु च प्राप्यते तस्याः सम्पूर्णं विवरणम्। यः कोऽपि एतेषां ग्रन्थानां गहनतमम् अध्ययनं करोति तस्य कृते एते चमत्काराः पूर्वकृता इव प्रतिभासन्ते, नात्र सन्देहः।

यमः – प्रभो! यद्यप्यस्ति पृथिव्यां मानवेभ्यः सुखदायिनी हि सा वैज्ञानिकी समुपलब्धिः, तथापि नास्ति तत्र कुत्रापि शान्तिः। अनवरतं प्रवर्धमाना जनवृद्धिः विभिन्नानां धर्माणां समुदायानां सम्प्रदायानां तत्तन्नेतृणां चाभिवृद्धिः सततं चिन्तनीयास्ति।

नारदः – प्रभो! मयापि दृष्टं यत् भारते यत्र भारतीया संस्कृतिः श्रेष्ठतमा आसीत् तत्र विविधधर्मावलम्बिनां प्रभावः अस्याः कृते अवरोधकर इव प्रतीयते।

नारायणः – सत्यं भारते इदानीं धर्मनिरपेक्षं जनतन्त्रम्, प्राक्तनापेक्षया अर्वाचीने भारते बहूनि अन्तराणि, तदानीं केवलम् आर्यधर्मावलम्बिनः एवात्र निवसन्ति स्म, इदानीं तु भूलोकस्य सर्वे धर्माचारिणः भारते निवसन्ति।

इन्द्रः – भगवन्! भारतीयैः ते सर्वे विधर्मिणः निष्कासनीयाः।

विष्णुः – भो देवराज! भारतं तु तपोभूमिः, पृथिव्यां सर्वे मानवाः इत एव शिक्षिताः बभूवुः परं काले-काले सर्वत्र चक्रवत् परिवर्तनं तु निश्चितमेव।

इन्द्रः – प्रभो! अहं भवतामाशयं न ज्ञातवान्, सुस्पष्टं कथयन्तु भवन्तः।

विष्णुः – वत्स! सर्वे जानन्ति भारतस्य महिमानम्। प्राचीने काले अयं देशः स्वकीयेन ज्ञानबलेन वैभवबलेन विविधरत्नागारत्वेन च त्रिभुवनविदित- कीर्तिरासीत्, यशः प्रभावाच्च समये समयेऽत्र समागताः विभिन्नाः वैदेशिकाः। दौर्भाग्यात् कदाचित् मुस्लिमशासकैः कदाचिद् आङ्ग्लशासकैः शासनमत्र विहितम्, तदनन्तरं ज्ञाताज्ञातराष्ट्रानुरागिभिः प्राणार्पणेन बलिदानेन च देशोऽयं स्वतन्त्रतां प्रापितः। तदा प्रभृतिः ते वैदेशिकाः यवनादयः अत्र स्वगृहेष्विव निवासमाकल्प्य अत्रैव हिन्दुभिः सह परस्परं बन्धुभावं समाधृत्य राष्ट्रियभावनया सह अद्यापि निवसन्ति।

नारदः – प्रभो! मुस्लिमादयस्तु भवन्तं न जानन्ति न च भवन्तं भजन्ति, अल्लाहः ईशुः अपरो वा तेषामीश्वरः, ते निश्चयेन सनातनधर्मस्य विपरीतमाचरन्तः कथं हैन्दवानां बन्धुत्वं स्वीकुर्वन्ति? इत्थं तेषां परस्परं कल्याणमपि कथं भविष्यति?

नारायणः – वत्स! तव हृदये तु सदैव लोकोपकारस्य भावना जागर्ति। अत्र नास्ति दुराग्रहः यत् मुस्लिमाः अल्लाहं मन्यन्ते, ख्रीष्टाः ईशुं,

सिक्खाः नानकं, बौद्धाः बुद्धम्, जैनाः महावीरं परं सर्वेषां धर्माणां मूलं तु एकमेव हि मानवस्य उत्पत्तिः सर्वेषां धर्मावलम्बिनां गृहे जननीजठरात् समरूपा भवति, मृत्युः सुखानि दुःखानि च समरूपेण भवन्ति, त्रिविधदुःखेभ्यः निवृत्तिः मोक्षप्राप्तिश्च सर्वेषां परमोद्देश्यम्, अतो यो माम् नारायणत्वेन भजते तस्य कृतेऽहं नारायणः, अल्लाहेति यो भजते तस्य कृते अल्लाहोऽस्मि। वेदेषु पुराणेषु कुरान-बाइबिलादिग्रन्थेषु सतां वचनेषु च यत्तत्त्वं तदेव ईश्वरः।

बृहस्पतिः - प्रभो! यदा सर्वेषां मानवानां परमेश्वरस्य रूपमेकमेव तदा ते नानाविधाः धर्माधिकारिणः मूढा इव कथं परस्परं कलहायन्ते?

नारायणः - भो देवगुरो! सत्योपासकाः ये के च धर्माचारिणः ते कदापि परस्परं न द्रुह्यन्ति, न जल्पन्ति, न च कलहमाचरन्ति। ननु तेषां मध्ये केचन प्रभावशालिनः दुष्टधियः नेतारः शासका वा भवन्ति, ते एव कलहस्य कारणानि, यथा मन्दिरं संत्रोट्य मस्जिदस्य निर्माणमथवा मस्जिदं वा गिरिजाघरं समुत्पाट्य मन्दिरस्य निर्माणम्। सत्यं तु यत् नात्र मन्दिरस्य क्षतिर्भवति न वा मस्जिदस्य वा गिरिजाघरस्य अत्र या महती क्षतिर्भवति सा तु पारस्परिकबन्धुत्व-भावनायाः। वस्तुतः मन्दिर-मस्जिद-गिरजाघरादीनि देवाराधनस्थलानि तु निर्विवादेन समाना एव। यथा दीपप्रज्वालनार्थमा-धारत्वेन दीपस्य आवश्यकता भवति तद्दीपकं मृण्मयं भवेद्वा स्वर्णरजतादि-धातुनिर्मितं तस्मिन् तैलं भवेद्वा घृतं तज्जन्यप्रकाशस्तु एक एव।

नारदः - भगवन्! वयम् अल्लाहादिकस्य ईश्वरस्य स्वरूपं ज्ञात्वा प्रसीदामः, परम् अस्मान्-देवान्तु भारतीया एव पूजयन्ति जानन्ति च। वयमपि वारं-वारं भारते अवतारार्थमभिलषामः, अतो भवन्तं प्रार्थयामः युगेऽस्मिन् सनातन- धर्मस्य रक्षार्थं संस्कृतेः संरक्षणार्थञ्च भारतवासिभिः किं कर्त्तव्यम् इति सुस्पष्टमादिशतु।

विष्णुः - वत्स! संस्कृतप्राणाः भारतीया संस्कृतिस्तु खलु निखिले ब्रह्माण्डे अद्वितीयाऽस्ति। अतो भारतवासिभिः भारतस्य रक्षार्थं सर्वप्रथमं सुरभारत्याः रक्षा कार्या।

नारदः – भगवन्! साम्प्रतं तु भारते संस्कृतस्य भविष्यं तमसावृतमिव दृश्यते। अत्रत्याः वैज्ञानिकाः आङ्गलबुद्ध्या वैज्ञानिकीम् उन्नतिं कर्तुमिच्छन्ति तेषां दृष्टिपथे इंग्लैण्डः-रूस-जापान-अमेरिकादीनि राष्ट्राणि एव विकसितानि, तत्रत्याः वैज्ञानिका एव आप्ताः वैज्ञानिकाः, तेषामनुकरणमेव अत्रत्यानां गतिः।

यमः – सत्यम् इदमेव कारणं यद् मम राज्ये विभिन्नेषु नरकेषु साम्प्रतं कोटिशः उत्कोचपाथेयाः, मद्यपाः भ्रष्टाचारिणः परक्षेत्रहारकाः, असत्येनार्जित- धनिनः एवानुदिनं समायान्ति स्वकर्माऽनुगुणं नारकीयप्रवासफलानि च भुञ्जते।

नारदः – प्रभो! एतेषां पापरतानां नरकवासिनां वा कृते किं कश्चिदुपायोऽस्ति? येन पृथिव्यां सर्वेषां भारतीयानां वा समेषां मानवानां दुर्गतिर्न भवेत्।

विष्णुः – अस्त्यत्र सरलतमः सदुपायः यदि भारतीयाः स्वसंस्कृतिमाचरेयुः संस्कृतभाषायाः प्रयोगं स्वमातृभाषारूपेण राष्ट्रभाषामाध्यमेन वा कुर्युः तर्हि नूनं भारते एव न अपितु निखिले संसारे शान्तिर्भविष्यति। वस्तुतः भारतीयप्राच्यविद्यया सह आधुनिकविज्ञानस्य संयोगेन आश्चर्यमयी भारतीया वैज्ञानिकी उन्नतिः अपि अन्ताराष्ट्रे एधिष्यते।

नारदः – भगवन्! तर्कयामि अधुनापि भारते संस्कृतोपासकाः वसन्ति किल, ये हि अनुभवन्ति यत् "भारतीये शरीरे भारतीयमेव मनः स्थापनीयम् न तु कृष्णमाङ्गलं मनः" अतः पुनः भवन्तं प्रार्थये कथं भारतीये शरीरे भारतीयं मनः स्थास्यति कथं वा भारतीयविधिना आधुनिकविज्ञानस्य उन्नतिः भविष्यति। विषयेऽस्मिन् भारतीयैः किं करणीयम्?

नारायणः – वत्स! भारते भाति भारती, संसारस्य सर्वे वैदेशिकाः विद्वांसः यवनाः, आङ्गलाः रूसादिवासिनश्च संस्कृतभाषायाः आदरं कुर्वन्ति। परं प्रायः आधुनिकाः भारतस्य पाश्चात्त्यानुगामिनः भारतीयाः जल्पन्ति यत् संस्कृतं तु केवलं ब्राह्मणानां भाषा वा कर्मकाण्डस्यैव भाषा अस्ति। भारते यदि संस्कृत-भाषा जनभाषा व्यावहारिकी भाषा वा भवेत् तर्हि भारतीये

शरीरे भारतीयं मनः स्थाष्यति, अतः सर्वैः भारतीयैः मिलित्वा अस्मासु प्रचारः करणीयः। विशेषेण अत्राहं कथयामि यत् कालवशात् ये केचन दोषाः भारतीयधर्मग्रन्थेषु कथञ्चिदपि दृश्यन्ते ते साम्प्रतं सन्त्यत्याज्याः पुनः अर्वाचीनविधिना वैज्ञानिकभाषायाः माध्यमेन अस्या सम्वर्द्धनं कर्त्तव्यम्। इत्थं यदि भारतस्य सर्वे नेतारः चिकित्सकाः अभियन्तारः उच्चाधिकारिणश्च स्व-स्वक्षेत्रेषु संस्कृतभाषायाः प्रयोगं करिष्यन्ति चेत् तर्हि पुनः भारतं प्राचीनां गुरुपदवीं समलङ्करिष्यति नास्त्यत्र लेशमात्रोऽपि संदेहावकाशः।

पटाक्षेपः

[इति कीर्तिवल्लभ 'शाकटायनेति' कविना विरचिता 'भारते भाति भारती-नामधेया' एकांकी समाप्ता]

घटोत्कच-वनम्

अथ प्रथमोऽङ्कः

यस्या भाति विभूतिदा भगवती याम्ये मुदा हिङ्गला,
वामे मानस[1]-मन्दिरं जलमयं क्रान्तीश्वरः सम्मुखे।
मध्ये गोरल[2]-भैरवो च वसतः श्रीनागबालीश्वरौ,
वन्दे तां करुणामयीं गुणमयीं चम्पावतीं सर्वदा॥१॥

प्रस्तावना

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः - अलमति विस्तरेण (नेपथ्याभिमुखमवलोक्य) आर्ये! कूर्माचले सम्प्राप्ता वयमिदानीम्। पश्य, चम्पावतीं परित उत्तुङ्गानां हरित-ललितवर्णानां विविधभूधराणां मनोहारिणी वलयाकृतिः पङ्क्तिः वस्तुतः अलौकिकीं शोभां धारयति।

नटी - नन्वार्यपुत्र! प्रकृत्या सुरम्यं रूपमवलोक्य त्वत्राति मोदते मे चेतः।

सूत्रधारः - इह खलु विविध-स्वरूपास्सिद्धाः गन्धर्वाः, ऋषयः, देवताः, मनुष्याः, किन्नराश्च सुखेन वसन्ति।

नटी - इयं देवभूमिः प्रतीयते खलु।

सूत्रधारः - आम् भगवतो महादेवस्यातिप्रियभूमिरियं यतो हि तस्य विविधानि मन्दिराणि विराजन्तेऽत्र यथा तारकेश्वरः, क्रान्तीश्वरः, हरेश्वरः, ऋषीश्वरः, मृडेश्वरः, दीप्तेश्वरः, बालीश्वरश्च। कूर्मावतारसमये विष्णोरंशभूतः कूर्मः अत्रैव वर्षत्रयं पादयोः स्थित्वा अस्याः माहात्म्यं वर्धयामास।[3]

---

1. मानसेयपर्वतेऽत्र मानसमन्दिरमस्ति इतः मानस-सरोवरस्य सीमा प्रारभते। स्कन्दपुराणस्य मानसखण्डे मानसेश्वर माहात्म्ये वर्णनमस्ति मानसखण्डे अध्याय सं. 65
2. गोरल इति क्षेत्रदेवः
3. स्कान्दे मानसखण्डे कूर्माचलाख्याने विस्तरेण वर्णनमस्ति।

नटी - आर्यपुत्र! नास्त्यत्र सन्देहावकाशः।

सूत्रधारः - आर्ये श्रुतं मया महाभारतान्ते भीमेनात्र स्वात्मजाय घटोत्कचाय चिरं निवासाय देवदारुवनविभूषितः स्थानविशेषः प्रदत्तः।

नटी - कथं कथम् आर्यपुत्र! घटोत्कचस्तु कर्णस्य अमोघशक्त्या मृत्युं गतः।

सूत्रधारः - आम् एवम् एव, परं त्वं न जानासि घटोत्कचस्य प्राणान्ते तस्यात्मना कुत्रापि स्थानं न प्राप्तम्। अनेनैव -

भारतान्ते तु भीमेन स्थानं तस्मै समर्पितम्।
अद्यापि वसते त्वत्र भीमपुत्रो महाबली॥२॥

आर्ये! ममाक्षिभ्यामवलोकय -

देवदारुमयेऽरण्ये राजतेऽत्र घटोत्कचः।
आगत्य दर्शनं कृत्वा सुखलाभं कुरुप्रिये॥३॥

नटी - आर्यपुत्र! अति सन्तुष्यामि।

सूत्रधारः - तर्हि कथं न्वस्माभिः कीर्तिवल्लभ-कविना विरचितम् अभिनवं नाटकमभिनेतुं यत्नो विधेयः। त्वं यथाशीघ्रं पात्राणि सुसज्जीकृत्य स्व-स्व पाठेषु सावहितानि कुरु। अहमपि सभ्यान् सहृदयान् निवेदयामि यत्तेऽपि दत्तावधानाः सन्तः घटोत्कच-वनं दृष्ट्वा कविं कृतार्थयन्तु।

(इति प्रस्तावना)

(ततः प्रविशति अन्यमनस्को भीमसेनः)

भीमसेनः - (भ्रमन्नात्मगतम्)

किं सत्यमस्तीति वयं प्रसन्नाः
जितेन राज्येन सुखेन किं वा।
किं कौरवाणां निधनं न याति
चित्तेषु नित्यं खलु पाण्डवानाम्॥४॥

आह! आशैशवादाप्तवैराः कौरवाः नः बान्धवा एवासन्। परम् -

ईर्ष्या-लोभेन द्रोहेण कुबुद्ध्या लुण्ठितेन च।
कौरवाश्शत्रुतां याता यया मृत्युमुखं गताः॥५॥

(इति चिन्तयन्सः एकस्या नद्यास्तटे वटतरोश्च्छायायाम् उपतिष्ठति। तत्रापि तस्य मानस-पटले क्रमेण जन्मतः अद्यपर्यन्तानि सर्वाणि चित्राणि समायान्ति यानि कौरवैः सह तेन व्यतीतानि। तान् स्मारं-स्मारं स इत्थं ध्यानमग्नो दृश्यते यत्तस्येहलोकस्य स्मृतिः न भवति। अस्यामेवावस्थायां सः स्वाग्रभागे समागच्छन्तीं रूपमतीं रमणीं विलोक्य इत्थं विचारयति)-

अत्रैवागच्छन्ती विविधहासविलासमयी सा।
किमियमस्ति पाञ्चाली कन्यापरा भवितुं शक्यतेऽत्र॥६॥

अये

चित्तं हरति मे सत्यं मनोज्ञा सा विलक्षणा।
श्रीर्नवार्जितराज्यस्य निश्चयेनातिभाति मे॥७॥

(विस्फारित-नयनाभ्यां विलोकयन्) यदि नास्तीयं द्रौपदी तर्हि कथं प्रसीदति मे वदनम्?

किंकारणेनात्र मदीयभावः
तां वीक्ष्य रम्यां प्रति संविधत्ते।
रतिः प्रसूता हृदये नवीना
न यौवनं मे न च कामतापः॥८॥

आह! इयमस्ति मम प्रिया हिडिम्बा, (निर्निमेषेण अवलोकयन्सः साश्रुनयनो भूत्वा प्रेमातिशयेन तां प्रति न किमपि वक्तुं शशाक।)
(गायकस्वरः) -

तां वीक्ष्य कम्पिततनुः वदनेन दीनो
रागान्वितो विविधभावविभावपूर्णः।
साश्चर्यभीतिशुभदृष्टिसमादरेण
भीमो बभूव जडवद् हि बलेन हीनः॥९॥

हिडिम्बा - आर्यपुत्र! भवद्भिः नान्या शङ्का विधेया। धर्मक्षेत्रे विजयवृत्तं श्रुत्वा-

अहं हर्षातिरेकेण भवतां दर्शनेच्छया।
स्वकीयाशंसनं नीत्वा समागतात्र केवलम्॥१०॥

नाथ! स्मराम्यहमद्यापि तद्दिवसविशेषं, यदा भवतां समेषां पाण्डवानां वधार्थं हिडम्बकेन तस्मिन्निबिडेऽरण्ये सम्प्रेषिता। सौभाग्येन भवन्तं विलोक्य मम मतिः परिणता, चिन्तयामि भवतां दर्शनमात्रेण ममासुरीयाः भावाः गताः किल। झटिति तत्र मया विचारितं, नन्वयं श्यामाङ्गः तेजोनिधिः पुरुषविशिष्टो बलवान् मदर्थे पतिः भवितुं योग्यः। अत एव -

अस्य मांसेन या तृप्तिः साचिरास्वाददायिनी।
पतित्वेन सदा योगः सुखभोगे भविष्यति॥११॥

अनेनैव विचारेण -

विलोक्य सौन्दर्यमयं शरीरं
तेजस्वितां दिव्य-प्रभाविशेषाम्।
मया सहर्षं हृदयेन नूनं
त्वङ्गीकृतो नाथ पतिस्त्वमेव॥१२॥

अपि च

भ्रातृ-स्नेहेऽस्ति या प्रीति-
रल्पा सा दृश्यते भुवि।
पति-स्नेहस्तु पूर्वाणां
जन्मनां सञ्चितं धनम्॥१३॥

इति विचार्य मया भ्रातुराज्ञा तिरस्कृता। आर्यपुत्र! अद्याप्यहं तान् सुदिवसान् संस्मृत्य सुखमनुभवामि।

आयान्ति नित्यं मृदुमानसे मे
दिनानि सर्वाणि मनोहराणि।
शृङ्गारखेलेषु रतानि तानि
खल्वावयोः केलि-कलायुतानि॥१४॥

किमन्यत् -

आयाति नित्यं हृदये मदीय
आलिङ्गनं स्नेहमयं त्वदीयम्।
नखक्षतं भूरि रतप्रसङ्गः
क्रीडाविलासे मदनस्वरूपम्॥१५॥

आर्यपुत्र! मातुः कुन्तीदेव्यास्सहितं युधिष्ठिरस्य चाज्ञया यदा आवयोः सम्मेलनं विवाहश्चाभवत् तदाऽऽवयोः स्थितिः कियदानन्दकारिणी आसीत्। स्वमाययाऽहं भवन्तमाकाशमार्गेण धरायाः कस्मिन् प्रदेशे न नीतवती? प्रायः उन्नतोन्नताः पर्वताः गह्वरादयः शोभनानि नगराणि नद-नदीनाम् उद्गम-स्थलानि विश्वस्य सर्वे सौन्दर्ययुताः स्थलविशेषाः आवाभ्यां भ्रमिता विहरिताः च।

नाथ! इदानीमपि तदानीन्तनाः रहस्यावयोः रसप्लाविताः। शृङ्गारमण्डिताः वार्तालापाः भवतां कराङ्गुलीभिः ममाङ्गेषु जायमानः स्नेहयुक्तो मधुरस्पर्शः माम् स्पन्दयति रोमाञ्चयति च किमधिकम् -

एकान्तवासः स्वजनस्य योगः
सचुम्बनं स्वादुमयी च वार्ता।
प्रियाङ्गुलीनां सुखदस्सुरम्यः
स्पर्शो न कस्मै रुचिरो विभाति॥१६॥

आर्यपुत्र! यद्यपि भवतां समयानुसारेण एकवर्षाभ्यन्तरे एव मया भवतां संसर्गे किं किं न शिक्षितं तथापि मनस्तु मन एव

जानामि नाथ भवतां हृदयं विशालं
भावाश्च सन्ति नितरां मयि सानुकूलाः।
जाने न तर्हि भगवन्नति भीतभीता
सत्यं भवामि मनसा खलु भिन्नरूपा॥१६॥

भीमः- (रोमाञ्चितः सहसाऽऽसनादुत्थाय चतुर्दिक् विलोक्य) अये! अत्र तु सर्वथा शून्यमस्ति। ईदृशं कथं भवितुं शक्यते? इतः पूर्वं मया आभ्यां नयनाभ्यां स्वाभिमुखे आगम्यमाना हिडिम्बैव दृष्टा, तया मां प्रणम्य स्वहृदि स्थिताः भावा एव न प्रकाशिता अपि तु अस्माकं विजयमभिलक्ष्य स्वकीया शुभकामनाश्चार्पिताः। आश्चर्यं महदाश्चर्यं मामुपेत्य सा क्व गताः? (उच्चैः) हिडिम्बे! मां परित्यज्य त्वं क्व गता?

(अप्राप्तप्रत्युत्तरं सः मनसि विचारयति) सम्भवतः सा ममोपहासं करोति वा स्नेहव्याजेन क्रीडारता वर्तते (पौनः पुन्येन उच्चैः कथयति) हे हिडिम्बे! क्व गताऽसि। मामन्तिके आविर्भव। अहं त्वं द्रष्टुमभिलषामि।

कथं मुञ्चसि माम् शुभ्रे हिडिम्बे हे शुभानने।
मायाविनि महाभद्रे! सम्मुखे सुस्थिरा भव॥१८॥

इति ब्रुवन्स इतस्ततः धावति वारं-वारं स एव ध्वनिः श्रूयते -

कथं मुञ्चसि माम् शुभ्रे हिडिम्बे हे शुभानने।
मायाविनि महाभद्रे! सम्मुखे सुस्थिरा भव॥१९॥

पटाक्षेपः

इति प्रथमोऽङ्कः

द्वितीयोऽङ्कः

सायंतनस्समयः। सुसज्जितेऽन्तःप्रकोष्ठे युधिष्ठिरः सुखदायिन्यामासन्दिकायां समुपविष्टः दृश्यते। अत्र विविधानां दीपानां प्रकाशः अस्याः सान्ध्यवेलायाः शोभाम् अभिवर्धयति। सहसाऽत्र प्रविशति दीनवदना द्रौपदी।

युधिष्ठिरः – द्रौपदीं वीक्ष्य 'अये पाञ्चालि'! कथमन्यमनस्काऽसि?

द्रौपदी – नाथ! व्यामोहसंवृत्तं भीमसेनं दृष्ट्वाद्य खलु ममेयं गतिः। चिन्तयामि भीमसेनस्य सम्भ्रमस्य किं कारणं स्यात्?

युधिष्ठिरः – प्रिये! अहमपि तथैव चिन्तयामि। सन्ध्योपासनान्ते यदाहं प्रणामार्थं मातुः समीपे गतवान् आसम् तदा मयातिम्लानमुखः भीमसेनः दृष्टः। तस्य शिथिलतायाः कारणं ज्ञातुं मदीयप्रश्नोत्तरे श्रान्तोऽस्मीत्युपन्यस्तं तेन।

द्रौपदी – देव! अपरिमितबलसम्पन्नास्सन्ति भीमसेनमहाभागाः, इतः पूर्वं तु न कदापि श्रान्तिं गताः परमद्य ....।

युधिष्ठिरः – प्रिये मम हृदयेऽपि एतादृशो विचारः समायातः। चिन्तयामि भार्या हि पत्युः रहस्यं ज्ञातुं समर्था भवति। अतः साम्प्रतं त्वं तस्य परिचर्यायै दत्तावधाना भव, नियमानुसारेणापि आवयोः सानिध्यावधिः इदानीं समाप्तिं गतः। विश्वसिमि निश्चयेन तव सेवया स गतश्रमो भविष्यति। यतो हि –

ज्ञातुं हि मन्ये भुवि मानवानां
पत्यू रहस्यं सहजं च लोके।
विपत्सु वा सौख्य-समादरेषु
भवन्ति सिद्धाः सफलाश्च नार्यः॥१॥

द्रौपदी – यदाज्ञापयति देव!

द्वितीयं दृश्यम्

भीमसेनस्य शयनकक्षः, द्रौपदी शयानस्य-भीमसेनस्य पादयोः तैलाभ्यञ्जनं करोति।

द्रौपदी - नाथ! काठिन्यावसरेष्वपि मया भवतां - मुखाम्बोजे कदापि श्रान्तचिह्नानि नैवावलोकितानि परमद्य भवतां हृदयस्था चिन्ता मदर्थे कष्टकरी एव न, अपितु भीतिं च ददाति।

भीमसेनः - प्रिये! मा भैषीः, नास्ति भीतेः किमपि कारणम्। चिन्तया अलं स्वस्थोऽस्मि।

द्रौपदी - नाथ! भवतां प्रभारहिता-मुखाकृति एव मम जिज्ञासायाः कारणम्।

भीमसेनः - प्रिये! यदाहमद्य नद्याः जलेषु सान्ध्यकालिकीं सन्ध्योपासनां विधाय शिलाम् उपविश्य इन्दोः कौमुद्यां प्रकृत्या मनोहारिशोभायाः अवलोकने दत्तावधाना आसम् तदा मम मनसि नवार्जितस्य राज्यस्य विषये काश्चन प्रश्नविशेषाः समायाता तदानीमेव........।

द्रौपदी - आर्य! किमभवत्तदानीं स्पष्टं कथय?

भीमसेनः - प्रिये! तदानीं ममान्तिके सहसैव समायाता सा हिडिम्बा।

द्रौपदी - नाथ! इयं तु सुखदायिनी वार्ता। मम हृदयेऽपि तया सह सम्मेलनस्यातितीव्रतरीसमुत्कण्ठा बहोः कालाज्जागृता परं संकोचेन मया भवतां सकाशे न प्रकटिता चिन्तयामि क्षिप्रं हि ममाभिलाषः पूर्णत्वं गमिष्यति।

भीमसेनः - परं सा माम् प्रणम्य अस्माकं विजयोपलक्ष्ये स्व हार्दिकी शुभकामनाः दत्वा न जाने क्व तिरोहिता।

द्रौपदी - आर्यपुत्र! मया तु कुन्तीदेव्याः मुखात् श्रुतं यत्तया पुत्रस्य प्रसूतेरनन्तरं भवतां सानिध्ये नागमनाय प्रतिज्ञा कृताऽऽसीत्।

भीमसेनः - सत्यमस्ति परं साद्य माम् प्रणम्य स्व मानसीं व्यथां कथयित्वा न जाने क्व गता, वस्तुत इदमस्ति ममौदासीनस्य कारणम्।

द्रौपदी - नाथ! जानामि तस्याः व्यथायाः कारणम्।

भीमसेनः - कथम्?

द्रौपदी - आर्यपुत्र! अहमेका स्त्री, लोकोऽयं सम्यग् जानाति पतिरेव स्त्रीणां सर्वस्वं भवति। दौर्भाग्येण मया सा न दृष्टा, तथाप्यत्र चिन्तयामि। यद्यपि रक्षः कुले प्रसूता सा राक्षसी, तथापि भवन्तं पतित्वेन हृदि संस्थाप्य प्राणान्धारयति। यतो हि-

पतिरेव हि सर्वस्वं जीवनेऽस्मिन् सदा शुभे।
आधारत्वेन सर्वासां नारीणां परमेश्वरः॥२॥

भीमसेनः - प्रिये! अहमप्येवं चिन्तयामि परं........।

द्रौपदी - परं किं? भवद्भिः तया सह विवाहस्तु कृत एव।

भीमसेन - आम्।

द्रौपदी - विवाहोपरान्ते भवद्भिः कथं तस्याः परित्यागः कृतः -

पृच्छामि नाथमहमद्य विशेषप्रश्नम्
किं नास्ति सात्र भवतां परिणीतभार्या।
यद्यस्ति चेत्सकलसौख्यदयादिभावै-
श्चास्मत्कृते न किल सास्ति सुरक्षणीया॥३॥

किमधिकं तस्यात्मजस्य घटोत्कचस्य बलिदानं तु पाण्डवानां कृते अविस्मरणीयः नास्ति किम्?

भीमसेनः - प्रिये नन्वहं तस्याः परित्यागाय सापराधोऽस्मि, वस्तुतः अस्माकं तात्कालिकी दशाऽपि नासीत् सुसमीचीना पुनश्चात्र मात्राज्ञापि बलीयसी आसीत्। (तस्याः स्वरूपं संस्मृत्य)

संस्मृत्य तस्याः मधुरं स्वभावं
त्यागं च मौनं सरलाकृतिञ्च।
श्रद्धान्वितायाः नु हिडिम्बिकाया
जागर्ति मन्येऽत्र ममात्मभावः॥४॥

द्रौपदी - नाथ! इदानीं शङ्कान्विताऽहं, भवद्भिस्तु तस्याः माधुर्यादीनां प्रशंसा कृता परन्तु मया सर्वत्रैव राक्षसानां भीषणाकृतिः विषय एव श्रुतं, किं नास्त्यत्र विरोधाभासः?

भीमसेनः - प्रिये! सत्यमस्ति भीषणाकृतय एव भवन्ति राक्षसाः परं नन्वपरिमितबलान्विता महा मायाविनी सा सर्वदा मया सौम्या शृङ्गारान्विता-रूपमती इवावलोकिता। आविवाहात् घटोत्कचस्य जन्मपर्यन्तं तया सह मम सर्वविधसाहचर्यमभूत्। तदानीं सा स्वकीयया प्रतिज्ञया मातुः कुन्तीदेव्याः वचनानुसारेण च नित्यं प्रभातकाले स्व मायया माम् आकाशमार्गेण नीत्वा धरायाः रम्यतरेषु भागेषु गच्छन्ति स्म तदनु प्रत्यहं भानोः अस्तं गते सति माम् पाण्डवेषु समर्प्य स्वस्थाने प्रत्यावर्तितं भवति स्म।

अहो तदीया शुभ-सौम्यभावना
सदा समायाति मदीयमानसे।
यथा कवीनां महनीय कल्पना
करोति नृत्यं खलु सान्द्रमेदुरा॥५॥

शुभानना सा ललिता मनोज्ञा
विनम्रमूर्तिस्तरुणी सुरम्या।
विभाति नित्यं मृदु-मानसे मे
प्रिया सखी शुभ्रमनोहराङ्गी॥६॥

द्रौपदी - यदि भवतामनुज्ञा स्यात्तर्हि ममैकं निवेदनमस्ति।

भीमसेनः - प्रिये! सुस्पष्टं कथय किमिच्छसि?

द्रौपदी - अत्र खलु अस्माभिः सह निवासाय तां हिडिम्बिकामाह्वयतु भवान्। अनेन तस्याः पुत्रेण सह पौत्रशोकतापोऽपि किञ्चित् शैथिल्यं गमिष्यति तथा च प्रियपुत्रपौत्रयोः विरहवेदनापि शान्तिं गमिष्यति।

भीमसेनः - प्रिये! तव कथनं तु सत्यं परं रक्षः कुले प्रसूता सा .....।

द्रौपदी - नाथ! रक्षः कुलेन किं? किं राक्षसानावयवेषु प्राणाः न भवन्ति वा? तेषां हृदयं न भवति। पापाचाररतस्य हिरण्यकश्यपस्य सूनुः प्रह्लादः

किं जनैः नाद्रियते वा? किं रक्षः कुले समुत्पन्नो विभीषणः तत्र भगवता रामेण नालङ्कृतः? अतो हिडिम्बाऽपि पाण्डवैः सततं समादरणीया संरक्षणीया च। यतो हि –

सुशीलातिविनम्रा सा हिडिम्बा धर्मचारिणी।
रक्षःकुले प्रसूताऽपि रक्षणीयाऽस्ति पाण्डवैः॥७॥

पुत्रशोकेन सन्तप्ता सन्दग्धा विरहाग्निना।
वधूरूपेण सा ग्राह्या पाण्डुपुत्रैर्विशेषतः॥८॥

भीमसेनः – (दीर्घं निःश्वस्य) पाञ्चालि! सत्यं खलु सर्वं परं कृतप्रतिज्ञा सा पुनर्निवासाय ममान्तिके नैवागमिष्यतीति सम्यग् जानामि।

द्रौपदी – नाथ! कथं नैवागमिष्यति का च तस्या प्रतिज्ञा?

भीमसेनः – प्रिये! जानामि नासीत्कापि तस्या प्रतिज्ञा परं तदानीन्तनीं मम प्रतिज्ञामेव शिरोऽवधार्य सा तस्या पालनं करोत्यनेन।

द्रौपदी – प्रभो! तत्र कासीत्भवतां प्रतिज्ञा अहमत्र ज्ञातुमभिलषामि?

भीमसेनः – (साश्रुनयनः सन् गद्गद्हृदयेन) प्रिये! पुत्रोत्सवं यावत् हिडिम्बया सह निवासाय ममैवाभिमतमासीत्तदानीम्।

स्वीकृत्य ममोक्तिं या क्व निर्गता नैव जानामि सत्यम्।
अस्मि मन्दभाग्योऽहं वन्ध्या सा हिडिम्बा लोके॥९॥

इति ब्रुवन्सः स्फुटतया रोदति नाट्येन वारं वारं – अश्रून् प्रोञ्छति।

द्रौपदी – कथं रोदिषि भवान्? भवन्तस्तु वीरपुंगवः, जानन्ति च जगत्यस्मिन् संयोगो विप्रयोगः सुखानि दुःखानि च विधिवशादेव प्राप्तव्यानि भवन्ति तर्हि?

प्रसूता का चिन्ता तव हृदि नवा कंटकमयी
समग्रे संसारे न खलु भुवि शक्तः प्रभवितुम्।
नरः किञ्चित्कर्तुं भणति शुभवाणीं बुधजनो
जगत्यस्मिन्मन्ये सकलसुखभोगो विधिवशात्॥१०॥

इदं श्रुत्वा भीमसेनः शान्तो भवति। तस्य पादयोः तैलाभ्यंजनं कुर्वती द्रौपदी दृश्यते। शनैः शनैः भीमसेनस्य नेत्रयोः निद्रा समायाति। निद्रायुतं भीमं वीक्ष्य द्रौपदी अपि पर्यङ्कस्य अपरभागे शयनं करोति।

"क्षणानन्तरं भीमसेनः स्वप्नरतो भवति तदा अत्याधुनिकरीत्या ईदृशं यवनिकापातो भवति यद्दर्शकाः सहजेनानुमानयन्ति यद् भीमः स्वप्नावस्थायां विचरणं करोति। सद्यः दर्शकानां समक्षे निबिडं वनं दृष्टिगोचरो भवति अत्र प्रविशति विविधैः अस्त्र-शस्त्रैः विभूषितः क्रीडमानः बालरूपो घटोत्कचः

गायकस्वरः -

अतुलितबलयुक्तः भीमपुत्रः प्रतापी
खचितमणिसुगात्रः पूर्णदम्भानुरागी।
असुरकुलवरेण्यः पाण्डुवंशाभिलाषी
कलयति शुभक्रीडां दिव्यशस्त्रैरिदानीम्।।११।।

घटोत्कचः -

स्वप्रसूतां महामायां प्रच्छाद्य भुवि सर्वतः।
शस्त्रैः क्रीडाम्यहं बालो भीमपुत्रो घटोत्कचः।।१२।।

भीमसेनः - एहि एहि वत्स घटोत्कच! एहि एहि। अहं तव हृदयालिङ्गनं करोमि। अत्रागच्छ ममाङ्के उपविश, चिरादहं त्वां द्रष्टुमभिलषामि।

कुशलं ब्रूहि भो वत्स! कुत्र ते वसतिः खलु।
स्वर्गे वा देवलोके वा पृथिव्यां वान्तरिक्षके।।१३।।

युद्धभूमौ तु मां त्यक्त्वा क्व प्राणा निर्गता तव।
सततं चिन्त्यमानोऽहं दुःखितोऽस्मीह साम्प्रतम्।।१४।।

घटोत्कचः - किं नाम कुशलं तात? ननु तस्मिन् जन्मनि रक्षःधर्मत्वेन ब्रह्मद्रोहादीनां क्रूरकर्माणि ममात्मानं भ्रमयन्ति - तात -

क्व नाको देवलोको वा मर्त्येऽपि तु न मे स्थलम्।
न लब्धं साम्प्रतं तात व्यथेयं बहुदुःखदा।।१५।।

भीमसेनः – आह प्रिय वत्स! किमाश्चर्यम्? मया तु विज्ञैः श्रुतं यः कोऽपि वीरः धर्मयुद्धे स्वामिनः रक्षार्थं प्राणान् त्यजति तस्य दुर्गतिः न भवति पुनः त्वं तु स्वपुत्रेण अंजनपर्वेण सह पित्राज्ञया युद्धे स्वकीयं सर्वस्वं समर्प्य अस्माकं विजयहेतोः साधनम् आसीः। पुत्र! श्रुतिः भणति आज्ञाकारी पुत्रः ईश्वरप्रियः भवति खलु पितृभक्त्या तस्य परलोकः सुधामयो भवति। परं ब्रह्माण्डे साम्प्रतमपि अलब्धस्थलं त्वां विज्ञाय प्रकम्पितो भवति मदीयं मानसं शरीरञ्च। वस्तुतः –

जितं हि युद्धं जयनामधेयकं
कृपाफलत्वेन त्वदीय पाण्डवैः।
अहो! न शान्तिं लभते तवात्मे
त्वेतत्तु दुःखं बहुकष्टकारकम्॥१६॥

आह!

हिताय किं पुत्र तवार्थमद्य
कर्तुं समर्थो हि भवान्यहं किम्।
तद्ब्रूहि सर्वं सकलं सुवृत्तं
यत्नं करिष्यामि सुशान्तिकामः॥१७॥

घटोत्कचः – भो तात! यदि भवन्तः ममोद्धारं कर्तुमभिलषन्ति चेत्तर्हि भरतखण्डस्योत्तरस्यां दिशि प्रकृत्याः सुरम्यस्थलेषु पर्वतेषु यत्रोत्तरवाहिनी काऽपि नदी स्यात्तत्र मां प्रतिमारूपेण स्थापयन्तु। तत्राहं देवत्वेन आप्लवं यावत् सुखेन स्थाष्यामि। यः कोऽपि श्रद्धया ममार्चनं ध्यानं वा मदर्थे दीपदानं करिष्यति तस्मै अहं यथाशक्ति सहायको भविष्यामि।

दृश्यपरिवर्तनम्

स्वप्नान्ते विगतनिद्रः भीमः पर्यङ्कात् सहसोत्थाय इतस्ततः धावति कुत्रापि घटोत्कचं न वीक्ष्य बारं-बारं तस्य स्मरणं कृत्वा मूर्च्छितो भवति, विगतचेतनं भीमसेनम् अवलोक्य द्रौपदी उच्चैः रोदनं कृत्वा पाण्डवानाम् आह्वानं करोति।

द्रौपदी - भो भो पाण्डवाः! झटित्यागत्य विपद्ग्रस्तं भीमसेनं रक्षयन्तु भो पाण्डवा ....। श्रुतमात्रेण सर्वे भ्रातरः भीमसेनम् उपगम्य शीततोयैः सम्मार्ज्य भीमसेनस्योपचर्यां कुर्वन्ति। यदा भीमसेनस्य चैतन्यमायाति तदा युधिष्ठिरः तं पृच्छति।

युधिष्ठिरः - भो अनुज! नन्वेतावती संघर्षमयी अवस्था मया व्यतीता परं तव हृदये कदापि दैन्यादयो भावाः नावलोकिताः, परमिदानीं मूर्च्छितं त्वां विलोक्य कम्पन्ते ममाङ्गानि।

समागतो नवो व्याधिरथवा मोहविभ्रमः।
मूर्च्छायाः कारणं किं वा ज्ञातुमिच्छामि साम्प्रतम्॥१८॥

भीमसेनः - भ्रातृवर्या! स्वप्ने समागत्य घटोत्कचेन कथितं यत् तस्यात्मानं शान्तिं नाधिगतम् तथा तस्मै कुत्रापि स्थानमपि न लब्धम् अनेन इदानीं संकटापन्नोऽस्मि। तेन मह्यं स्वात्मनः शान्तये वनप्रदेशेषु पर्वतीयभूभागेषु प्रतिमायाः स्थापनायै निवेदनमपि कृतम्। स्वप्नान्ते जागृत्य यदा मया सः न दृष्टस्तदा अहं मूर्च्छितो भूत्वा पृथिव्यां पतितः। इदानीं भवद्भिः कृतोपचर्योऽहं स्वस्थचित्तोऽस्मि अतः श्वः प्रभाते मायाविनं पुत्रं घटोत्कचं सुकरं स्थानं दातुं प्रयत्नं करिष्यामि एतदर्थमहं भवतामनुज्ञां याचे।

युधिष्ठिरः - यद्येवमस्ति तर्हि अस्माभिः कूर्माचले तस्य प्रतिमायाः विधिवत् प्राणप्रतिष्ठा कर्त्तव्या। अनेन घटोत्कचस्योद्धारेण सहैव कूर्मभूमेरलङ्करणं च भविष्यति। वस्तुतः कूर्माचलस्यापि जगति विशिष्टं महत्त्वं वर्तते। तत्र त्रेतायां भगवता रामेण अत्रत्यानां राक्षसानां विनाशाय कुम्भकर्णस्य मस्तकं हनुमतः माध्यमेन अत्र प्रक्षिप्तः। येन अत्रत्याः सर्वे राक्षसाः शिरोभारेण मृत्युं गताः, तदनु भगवतः शङ्करस्य वरत्वेन तस्य मस्तकस्थले सुविस्तृतः सरोवरः अभवत्।

जघान रामोऽसुरकुम्भकर्णं शिरः प्रक्षिप्तं ननु वानरेण।
सरोवरस्तेन कृतोऽत्र यो हि स राजते कूर्मगिरिः पृथिव्याम्॥१९॥

अतो -

तत्रैव गत्वाऽनु भूमिं खनित्वा
वृक्षान्समारोप्य वनानि कृत्वा।
मूर्तिं प्रतिष्ठाप्य जलाभिषेकैः
प्रसादनीयोस्ति घटोत्कचस्सः॥२०॥

सर्वे पाण्डवाः - वयमपि प्रियपुत्रस्य घटोत्कचस्य हिताय श्वः प्रभाते भीमसेनेन सह कूर्माचलं प्रति गन्तुकामा स्मः।

युधिष्ठिरः - भ्रातरः! श्वप्रभातं यावत् सर्वे भवन्तः सुसज्जिताः भवन्तु। उदयमानं भास्करं सम्पूज्य शुभमुहूर्ते वयं कूर्माचलं प्रति प्रस्थानं करिष्यामः। इदानीं विश्रामं कुर्वन्तु।

॥ इति द्वितीयोऽङ्कः॥

द्रौपदी - भो भो पाण्डवाः! झटित्यागत्य विपद्ग्रस्तं भीमसेनं रक्षयन्तु भो पाण्डवा ....। श्रुतमात्रेण सर्वे भ्रातरः भीमसेनम् उपगम्य शीततोयैः सम्मार्ज्य भीमसेनस्योपचर्यां कुर्वन्ति। यदा भीमसेनस्य चैतन्यमायाति तदा युधिष्ठिरः तं पृच्छति।

युधिष्ठिरः - भो अनुज! नन्वेतावती संघर्षमयी अवस्था मया व्यतीता परं तव हृदये कदापि दैन्यादयो भावाः नावलोकिताः, परमिदानीं मूर्च्छितं त्वां विलोक्य कम्पन्ते ममाङ्गानि।

समागतो नवो व्याधिरथवा मोहविभ्रमः।
मूर्च्छायाः कारणं किं वा ज्ञातुमिच्छामि साम्प्रतम्॥१८॥

भीमसेनः - भ्रातृवर्या! स्वप्ने समागत्य घटोत्कचेन कथितं यत् तस्यात्मानं शान्तिं नाधिगतम् तथा तस्मै कुत्रापि स्थानमपि न लब्धम् अनेन इदानीं संकटापन्नोऽस्मि। तेन मह्यं स्वात्मनः शान्तये वनप्रदेशेषु पर्वतीयभूभागेषु प्रतिमायाः स्थापनायै निवेदनमपि कृतम्। स्वप्नान्ते जागृत्य यदा मया सः न दृष्टस्तदा अहं मूर्च्छितो भूत्वा पृथिव्यां पतितः। इदानीं भवद्भिः कृतोपचर्योऽहं स्वस्थचित्तोऽस्मि अतः श्वः प्रभाते मायाविनं पुत्रं घटोत्कचं सुकरं स्थानं दातुं प्रयत्नं करिष्यामि एतदर्थमहं भवतामनुज्ञां याचे।

युधिष्ठिरः - यद्येवमस्ति तर्हि अस्माभिः कूर्माचले तस्य प्रतिमायाः विधिवत् प्राणप्रतिष्ठा कर्त्तव्या। अनेन घटोत्कचस्योद्धारेण सहैव कूर्मभूमेरलङ्करणं च भविष्यति। वस्तुतः कूर्माचलस्यापि जगति विशिष्टं महत्त्वं वर्तते। तत्र त्रेतायां भगवता रामेण अत्रत्यानां राक्षसानां विनाशाय कुम्भकर्णस्य मस्तकं हनुमतः माध्यमेन अत्र प्रक्षिप्तः। येन अत्रत्याः सर्वे राक्षसाः शिरोभारेण मृत्युं गताः, तदनु भगवतः शङ्करस्य वरत्वेन तस्य मस्तकस्थले सुविस्तृतः सरोवरः अभवत्।

जघान रामोऽसुरकुम्भकर्णं शिरः प्रक्षिप्तं ननु वानरेण।
सरोवरस्तेन कृतोऽत्र यो हि स राजते कूर्मगिरिः पृथिव्याम्॥१९॥

अतो -

तत्रैव गत्वाऽनु भूमिं खनित्वा
वृक्षान्समारोप्य वनानि कृत्वा।
मूर्तिं प्रतिष्ठाप्य जलाभिषेकैः
प्रसादनीयोस्ति घटोत्कचस्सः॥२०॥

सर्वे पाण्डवाः - वयमपि प्रियपुत्रस्य घटोत्कचस्य हिताय श्वः प्रभाते भीमसेनेन सह कूर्माचलं प्रति गन्तुकामा स्मः।

युधिष्ठिरः - भ्रातरः! श्वप्रभातं यावत् सर्वे भवन्तः सुसज्जिताः भवन्तु। उदयमानं भास्करं सम्पूज्य शुभमुहूर्ते वयं कूर्माचलं प्रति प्रस्थानं करिष्यामः। इदानीं विश्रामं कुर्वन्तु।

॥ इति द्वितीयोऽङ्कः॥

तृतीयोऽङ्कः

मञ्चे सुसज्जितं रथं दृश्यते। रथमारूढाः द्रौपदीसहिताः सर्वे पाण्डवाः प्रसन्नचेतसः प्रतिभासन्ते। सहसा समायाति दर्शकानां समक्षे गहनं पलाशवनम्। वनस्यान्तिमे भागे उत्तरस्यां दिशि समतलभूमेः स्पर्शं कुर्वती हरीतिमायुता विविधोच्चकोणीया सुमनोहरापर्वतावलिः खलु मनांसि हरति समेषां जीवधारिणाम्। शोभनं दृश्यमवलोक्य -

सहदेवः - भो ज्येष्ठ-भ्रातृवर्याः! कियान् शोभनोऽयं वनप्रदेशः, अत्रत्या प्रकृतिस्तु खलु मह्यं पूर्वपरिचितेवाभाति।

युधिष्ठिरः - आम् प्रियवत्स! पश्य इतः नातिदूरे वनवास-काले अस्माभिः बहुकालो व्यतीतः, श्रुतं मया अत्रत्याः जनाः अधुनापि तं स्थलं लोकभाषायां 'वनवासा' इति नाम्ना सम्बोधयन्ति। (वायुवेगेन धावन्तं रथं समुद्दिश्य) अये! वयं वनवास-स्थलीं सम्प्राप्ता एव 'भो भो सारथे! तावदवरोधय रथम्'। (रथः अवरुद्धो भवति, सर्वे पाण्डवाः रथादवतीर्य भूमिं प्रणमन्ति।) भूमिं प्रणम्य-

इयं धन्या भूमिर्हरित-वनयुक्ता सुललिता
सुसिद्धैर्ब्रह्माद्यैर्मुनिजनगणैर्वन्द्यमहिमा।
वसन्ते भागेऽस्मिन् विविधविधदेवाः प्रमुदिताः
नमस्कुर्वत्तस्यै हसति मम नूनं सुवदनम्॥१॥

अर्जुनः- आम् भ्रातः! अनायासेन मम हृदि-वनवास-कालस्य तत्सर्वं चित्रं चलचित्रमिव समायातम्। अहो! पश्य, इतः नातिदूरे पश्चिमोत्तरस्यां दिशि व्यान इति नामधेयकं शैलशिखरम्, यत्रास्माभिः अज्ञातवासे स्वकीयानि अस्त्र-शस्त्राणि सुगोपितानि।

युधिष्ठिरः- वत्स! सत्यमस्ति तव कथनम्, मया तु श्रुतं यदत्र अद्यापि अस्माकं सेनायाः ऐडीति नामधेयकस्य दिवङ्गतस्य वीरस्य आत्मा स्थायिरूपेण निवसति। अस्माकम् अवशिष्टानां शराणां धनुषाम् अन्य शस्त्राणां च रक्षां करोति। इतः परं जनानां कल्याणञ्च करोति। पर्वतीयप्रदेशेषु यः कोऽपि

तस्य स्मरणं वा पूजनं करोति उत अत्रागत्य तस्मै लौह-धनुषं समर्पयति निश्चप्रचं क्षेत्रदेवत्वेन अयं तस्य साहाय्यं करोति।

भीमसेनः -

नमस्करोमि तं वीरं क्षेत्रपालकदैवतम्।
ऐडीतिनामकं वन्द्यं वसन्तं व्यानपर्वते॥२॥

धनुर्बाणेन संयुक्तं हाहा-हूहूगणैर्युतम्।
रोगापहारिणं देवं सर्वकल्याणकारकम्॥३॥

अर्जुनः - भ्रातृवर्या! अहं तु इतोऽपि पूर्वं स्वपर्वतविजय-काले अनेनैव मार्गेण सुदूरं मानस-सरोवरं यावत् गतवान् आसम्। भ्राता! झटिति ममाक्षिभ्यां पश्यन्तूत्तरस्यां दिशि दृश्यतेऽत्र कूर्माचलो नाम गिरिः, अस्योपश्रृङ्खलायां पुरो विद्यमानः देव्या सनाथीकृतः पूर्णागिरिपर्वतः मन्ये कूर्माचले समागतानां स्वागतार्थं समुत्सुकः किल।

युधिष्ठिरः - तर्हि वत्स! अद्यास्माभिः देव्याः पर्वतचरणयोः गत्वा रात्रिः व्यत्येतव्या। सारथिमुद्दिश्य-भो सारथे अस्तमिच्छति साम्प्रतं भुवन-भास्करः अतो वेगेन रथं चालय, वयमद्य शारदायाः पुण्यतटं प्राप्य काँकरक्षेत्रे सायन्तनीयां सन्ध्योपासनां करिष्यामः। (सर्वे सुप्रसन्नाः पाण्डवाः रथारुढाः भवन्ति, सारथिः रथं चालयति)

(दृश्यपरिवर्तनम्)

शारदायाः तटे सुरम्या दृश्यावलिः दृश्यते। उत्तरस्यां दिशि पूर्णागिरि-पर्वतस्य विविधानि उन्नतोन्नतानि शिखराणि, नद्याः पारे नेपाल-क्षेत्रस्था पर्वतावलिः, दक्षिणस्याञ्च विशाला हरित-ललिता शस्य-श्यामला पलाशादिवन-शोभिता च समतल-धरा बलादाकर्षति समेषां समष्टिचित्तम्। प्राच्यां दिशि उत्तुंगशिखरात् उदीयमानो वासन्तिको भानुः रश्मिजालं प्रसारयन् सकलं भुवनमण्डलं पीतमयं कुर्वन्नस्ति।

अत्रैव नद्याः तटे एकस्मिन् शिलापट्टे कृतनित्यक्रियः सुखासीनो धर्मराजो दृश्यते। समयेऽस्मिन् क्रमशः भीमार्जुननकुलसहदेवाः ज्येष्ठं भ्रातरं

प्रणम्य भूमौ आसनबद्धाः भवन्ति।

युधिष्ठिरः - भो भ्रातरः! कल-कलनिनादिन्याः अस्याः शारदायाः तटीया इयं भूमिस्तु निश्चयेन मे मनो हरति। पश्यन्तु तावत् -

नद्याः कलकलं रम्यं सुरम्या वनराजयः।
मोहिनी प्रकृतिः सर्वा स्वर्गादपि गरीयसी॥४॥

अत्र वेगान्वितो वायुः देव्याश्चरणसेवकः।
अघं हरति सर्वेषां कीदृशोऽयं समागमः॥५॥

अपि च पुरः नद्या पारे खे उड्डीयमाना सिद्धब्रह्मदेवमन्दिरस्य सुविस्तृता पताका अनुपमा प्रतीयते मनसि ब्रह्मदेवं विचिन्त्य-

नेपालदेशे सुविराजमानं पुण्यं पवित्रं महनीयकीर्तिम्।
श्रीशारदास्नापितदिव्यमूर्तिं तं ब्रह्मदेवं मनसा स्मरामि॥६॥

अतोऽहं चिन्तयामि भीमसेनस्य मनोकामनायाः परिपूरणार्थं देव्याः समाराधनेन सह पर्यावरणस्य शुद्ध्यर्थञ्च कथन्नास्माभिः यज्ञपुरुषप्रीतयेऽत्र विशिष्टो यज्ञो विधेयः। यतो हि -

यज्ञेन निर्मलो वायुः यज्ञेन निर्मलं जलम्।
यज्ञेन सुखिनो देवाः भवन्ति वरदायकाः॥७॥

भीमसेनः - आम् भ्रातः! चिन्तयाम्यहमपि यत् भवतामनुज्ञां शिरोधार्य इतः एकाकी कूर्माचलं गत्वा तत्रात्मजस्य घटोत्कचस्य प्रतिमां प्रतिष्ठाप्य पूर्णाहुतिसमये यज्ञे सम्मिलितो भवेयम्।

युधिष्ठिरः - वत्स! यदिच्छसि तत्कुरु। वयमितः तवागमनं यावत् प्रतिदिनं यज्ञेन परमेश्वरं भजामहे।

(प्रसन्नवदनो भीमः झटिति गदां स्कन्धे निधाय धर्मराजं प्रणम्य विप्रैः सह प्रस्थानाय सज्जितो भवति।)

युधिष्ठिरः -

भवतु तव प्रयासः सर्वथा पुण्यकारी
जगदहितविनाशी सर्वदा पापहारी।
विबुधजन-विहारी लोक-कल्याणकारी
त्रिभुवन-सहकारी काम्यते धर्मचारी॥८॥

शिवास्ते पन्थानः सन्तु। जवनिका पातः

(दृश्य-परिवर्तनम्)

प्रसन्नवदनो भीमसेनः तत्रत्यैः कतिपयैः पथप्रदर्शकैः विप्रैः सह स्वगात्रानुसारेण शनैः शनैः यथा पादक्रमेण गिरिमार्गे प्रचलन् पूर्णगिरिपर्वतस्य मध्यभागं सम्प्राप्य एकस्मिन् शिलापट्टके समुपविश्य अनुगामि-विप्राणां प्रतीक्षां करोति। अत्र मार्ग-दर्शकाः विप्राः विशालकायस्य भीमसेनस्य पादप्रक्षेपस्य तुलनायां सर्वथा असक्ताः सन्तः विलम्बगामिनः दृश्यन्ते। इतः परितः विराजमानानां हरित-ललितां वनराजिं प्रकृत्याः मनोहारिणीं छटां चावलोक्य भीमसेनस्य मनसि किञ्चित् स्फुरणं भवति, अनेन सह सहजैव आयाति तस्य मानस-पटले हिडिम्बिकया सह केलि-विलासकालस्य प्रथमदिवसस्य समग्रं शृङ्गारयुतं तच्चित्रम्। किञ्चित् विचिन्त्य -

अहो! इयं तु सुपरिचिता भूमिः प्रकृतिश्च अत्र तु मया हिडिम्बिकया सह विलासो विरचितः। हे परमात्मन्! साम्प्रतं पुनर्नवो भवति मम हृदये हिडिम्बिकया सह संसर्गस्य प्रथमो माधुर्यमयो दिवसः -

संस्मृत्य संयाति प्रभो इदानीं
हिडिम्बिकायाः मधुराकृतिः सा।
पुरा मया याऽत्र सुचुम्बिताऽऽसीत्
सैवाऽग्र आयाति झटित्यहो मे॥९॥

अहो हिडिम्बिके!

स्मराम्यहं त्वत्र विहारकाले
वेण्या त्वदीयं खलु पुष्पगुच्छम्।
सञ्चूर्णितं सत् पतितं पृथिव्यां
सैव स्थलीयं प्रतिभाति मह्यम्॥१०॥

अपि च

अत्रैव सौन्दर्यमयी त्वदीया
कराङ्गुलिः रत्नविभूषिता सा।
स्नेहातिसिक्तेन मया तदानीं
विलोकिताऽऽसीत्सहजेव मन्ये॥११॥

(इत्थं वारं-वारं हिडिम्बिकायाः विविधकलान्वितं रूपमाधुर्यं विचार्य कथयति)

सत्यं ननु

प्रिये ते सौन्दर्यं मनसि मम धत्ते निजकलां
स्मरन्तः यां मन्ये किल निखिल-माधुर्य-सहिताम्।
त्वदीयां तां मूर्तिं सरसिजमयीं चातिललिताम्
इदानीं स्वात्मानं जडमिव भजेऽहं पुनरयम्॥१२॥

(इत्थं यदा सः हिडिम्बां स्मृत्वा अन्यमनस्को भवति तदा तस्यानुगामिनः विप्रजनाः एकपादान्वितेन पर्वतीयमार्गेण अतिकाठिन्येन फुल्लश्वासाः भवन्तः भीमस्यान्तिके समागत्य उपविशन्ति)

तेष्वेको विप्रः - भो वीर! वयं तु तव मार्गदर्शकाः परं तव विशालेन शरीरेण विस्तृतेन पादक्रमेण तवानुगमने सर्वथा असमर्थाः। यतो हि यत्र त्वं पादमेकं प्रक्षिप्य सहजतया अति मन्थरगत्या चलसि तत्रास्माकं शरीरस्य लाघवेन धावनस्योपक्रमोऽपि अस्थिरायते।

अतो वयं सम्प्रार्थयामः यत् इयमेव शोभना रीतिः यत् वयं केवलं मार्गस्य दिशानिर्देशनं कृत्वा निश्चिते स्थले तवानुगमनं कृत्वा मेलिष्यामः।

(सहसा मलिनाकृतिं भीमम् अवलोक्य)

द्वितीयो विप्रः - अये! अहं त्वत्र महाबलिनं भीममपि परिश्रान्तमवलोकयामि वस्तुतः नास्ति सुकरं पर्वतोल्लङ्घनम्।

तृतीयो विप्रः - अये! अयं वीरवरस्तु रोदति। तावदवलोकय अस्य नयनयोः निःसृतः अश्रुप्रवाहस्तु लघुनिर्झरिकायाः स्मरणं कारयति।

प्रथमो विप्रः - हं भो कथं रोदिति भवान्? किं कुमार्गचलनेन पर्वतारोहणेन च पादयोः क्षतं तु नाभवत्?

भीमसेनः - (मुखमुद्रया हास्यमभिव्यञ्जयन्) विप्र! न रोदिमि अहम् अत्र रोदनस्य किं कारणम्?

द्वितीयो विप्रः - भो वीर! न खलु किमपि गोपनीयम्। सर्वं कथयतः तवाक्षिणी पुनश्च -

कारणेन विना कार्यं यथा नास्तीह सम्भवि।
तथैवाश्रुप्रवाहोऽयं न ब्रूते किं तव स्थितिम्।।१३।।

अतो मां वद यथाशक्ति अहं तव शुभाशंसनाय प्रतिबद्धोऽस्मि। तथैव इमे सखायश्चापि।

भीमसेनः - भो विप्र! नाहं परिश्रान्तः, न च मे गात्रव्यथा काचित्। किं ब्रवीमि? वस्तुतः इयं मम सुपरिचिता प्रिया भूमिः। अत्रैव मया प्रियायाः हिडिम्बिकया सह प्रणयस्य प्रथमो दिवसः व्यतीतः। तदानीमहमाकाशमार्गेण तस्या महामायिन्याः माध्यमेन अत्राऽऽनीतः। अतो मनोहारिणीं दृश्यावलिं विहाय भूमेः पर्वतविषये च किमपि न जानामि। रोमाञ्चितः सन् भो विप्र!

आयान्ति चित्राणि मनोहराणि
मनोरमायाः नवानि तानि।
अस्यां धरायां परिचुम्बितानि
रूपाण्यनेकानि हिडिम्बिकायाः।।१४।।

संस्मृत्य नूनं विगतानि तानि
माधुर्यभावैः सह खेलितानि।
दिनान्यपूर्वाणि सुमिश्रितानि
विहारभूमौ परिकल्पितानि॥१५॥

अनेन भो विप्र! पतन्ति सत्यम्
अश्रूणि मे प्रेमरसाप्लुतानि।
मनःस्थ-भावैः सह गोपितानि
लालित्य-लास्यैरभिमण्डितानि॥१६॥

(भीमसेनस्य वार्तां श्रुत्वा सर्वे विप्राः विस्मिताः भवन्ति)

एको विप्रः - वीरवर्य! सत्यं खलु यत्र-कुत्राऽपि प्रेम्णावधारितं पादमेकमपि सर्वदा सतां स्मृतिपथे समायात्येव, अत्र तु प्रणयभूमिस्तव।

द्वितीयो विप्रः - भो वीर! वयं तु अनया पर्वतभूम्या सह स्वात्मानमपि धन्यं मन्यामहे। नन्वैतिहासिकोऽयं पूर्णगिरिः तवागमनेन प्रणय-प्रसंगेन च कृत्य-कृत्यः इवेदानीं संवृत्तः।

भीमसेनः - भो विप्र! पर्वतेऽस्मिन् कुत्रास्ति देव्याः आवासः किं चास्ति तस्याः माहात्म्यम्। सविस्तरं मह्यं ब्रूहि।

विप्रः - श्रूयतां तावत् वीरवर! ''कूर्माचलालङ्कारभूतेयं देवी सर्वेषां मनोभिलाषं पूरयति। श्रूयते, दक्षप्रजापतेः यज्ञ-विध्वंसावसरे यदा शिवेन शक्त्याः सतीदेव्याः विक्षतं शरीरं हिमालयं प्रति नीयमानम् आसीत् तदा अस्मात् स्थानात् पूर्वस्यां दिशि यत् सुरम्यं शैलशिखरं दृश्यते तत्रैव देव्याः त्रिवलययुता नाभिः पतिता, पतन-मात्रेण अस्य पर्वतस्य आतुंगात् समतलं शारदां यावत् नाभिः इव छिद्रान्वितो विस्तृतो लघु गर्तः समभवत् अतः देव्याः नाभेः अत्र दर्शनं भवति। यः कोऽपि जनः श्रद्धान्वितो भूत्वा अत्रागत्य देव्याः सकाशात् किमपि याचते तस्य याचना सफला भवति, इत्यत्र नास्ति सन्देहावसरः। इत्थं कूर्माचलेषु इदं देव्याः शक्तिपीठं वर्तते।

भीमसेनः – भो द्विजवर्याः! भूरिशः कृतज्ञोऽस्मि भवताम्, अधुनाहमितः एकाकी पूर्णागिरिदेव्याश्चरणयोः गत्वा तां समाराध्य पुनः भवतां सकाशे आगमिष्यामि तावत् भवन्तः अत्रोपविश्य मां प्रतीक्षन्ताम्।

विप्रगणाः – यथाभिलषतु वीरवर! शुभास्तव पन्थानः सन्तु।

दृश्य-परिवर्तनम्

(भीमसेनः यथाशीघ्रं देव्याः शैलशिखरं सम्प्राप्य हस्तौ संहतौ कृत्वा मनसि देव्याः स्मरणं कृत्वा प्रार्थयति)

या देवी निजदिव्य-सौम्य-सुखदैर्भावैः जनैः पूजिता
याऽऽराध्या करुणामयी गुणमयी विद्यामयी भूतिदा।
लोकानां हितकारिणी हि सततं या पर्वते राजिता
वन्दे तां परमेश्वरीं भगवतीं पूर्णागिरिं सर्वदा॥१७॥

मातर्हे जगदम्बिके सुसरले कारुण्यपूर्णामृते
त्वामाराध्य प्रणम्य नम्रशिरसा वन्दे सदा श्रद्धया।
ध्यात्वा देवि स्वरूपरम्यमतुलं दिव्यं त्वदीयं हृदि
याचेऽहं शरणान्वितः करुणया मार्गं शिवं मञ्जुलम्॥१८॥

(इत्थं यदा भीमसेनः देव्याः समाराधनं करोति तदा प्रतीयते अत्रत्याः सर्वा प्रकृतिः प्रफुल्लहृदया भवति। सुरभितः पवनः सर्वान् आनन्दयति। स्वतः तरुगणाः समग्रा वनराजयश्च पुष्पवृष्टिं कुर्वन्ति। वारं-वारं देव्याश्चरणयोः निपत्य साष्टाङ्गं प्रणम्य भीमसेनः विप्राणां पार्श्वे समागत्य पुनर्गदां स्कन्धे निधाय तैः सह उत्तरस्यां दिशि प्रस्थानं करोति।

(इति तृतीयोऽङ्कः)

चतुर्थोऽङ्कः

स्कन्धे गदां धारयन्हरिद्विभायुक्तवनप्रदेशे पथि अग्रे गच्छन्भीमसेनः पर्वतच्छटां विलोक्य मनसि विचारयति-

अहो! धन्येयं पर्वतीया भूमिः यदा अत्रत्या हरितवृक्षाणामावलिः। बलात् मनांसि चोरयति देवानां गन्धर्वाणां यक्षाणां किन्नराणां तत्र का कथा मानवानाम्? ध्यानेन भूमौ विलोकयतः अहो मम शरीरवैशिष्ट्यं नन्वस्मिन् प्रदेशे पूर्वं तया सह विहारावसरे यत्र यत्र स्थापितानि मम पादचिह्नानि इदानीमपि राजन्ते चिन्तयामि भविष्येऽपि जनाः एतान् विलोक्य मां स्मरिष्यन्ति। पुरो देवदारुं दृष्ट्वा-

अहो पुरस्तिष्ठति देवदारु-
श्छायाविशेषो भुवि राजते यः।
पुराऽऽवयोर्यत्र कृतो विरामः
चिरं समालिङ्ग्य् सकामभावैः[१]॥१॥

चिरं विचिन्त्य -

पुनस्समायाति हि मानसे मे
तदेव सर्वं सुविचित्रचित्रम्।
हिडिम्बकया सह क्रीडितो यः
विहारश्रृङ्गार-रसस्समग्र :॥२॥

इत्थं हिडिम्बिकायाः स्वरूपं स्मरन्सः तस्य देवदारुवृक्षच्छायामनुसृत्य उपविशति विचारयति च

अहो! विचित्रेयं दैवगतिः खलु, इतः पूर्वं मनसि कदापि एतादृशो विचारोऽपि नायातः यत् हिडिम्बिकायाः सह मया पूर्वं केलिविलासादयः आचरिताः, किं पुनः यस्यां भूमौ स्थाने वा विहारादयः कृता तत्र मम पुनर्गमनं मयि एकाकी भविष्यति, इति मया न चिन्तितम्।

---

1. अस्मिन् प्रदेशे अधुनापि भीमसेनस्य पदचिह्नानि वर्तन्ते।

संयोगेनाद्य प्रियात्मजस्य आत्मनः कारणेन इदानीमहं यस्मिन्पथि प्रचलन्नस्मि तस्मिन्ननु तया सह पूर्वाचरितेन संसर्गेण सहजेनायाति तस्याः माधुर्यमयी दिव्याकृतिः परं तदानीं संयोगः मामाह्लादयति स्म इदानीं तु वियोगः .... माम् रोदयति एव।

यतो हि-

वनानि सन्त्यत्र तथैव मन्ये
यथा पुराऽऽसीत्सुविहारकाले।
तथैव रम्यास्ति मही समग्रा
परन्तु सा नास्ति ततोऽस्मि दूनः॥३॥

अहो! अत्रैव तया प्रकृत्याः प्रकामं सौन्दर्यमवलोक्य मम माधुर्यविषयकं प्रश्नमवलम्ब्य प्रगीतं गीतं कियन्मधुमिश्रितमासीत् अनुभवामि इदानीमपि गीतध्वनिः मम कर्णयोः रससञ्चारं करोति।

नेपथ्ये - गीतध्वनिः श्रूयते।

अवलोकय नाथ स्वरूपमिदं मधुरातिशयं माधुर्यमयम्।
मधुरञ्जितमुञ्जितकान्तियुतं लावण्ययुतं मधुलास्ययुतम्॥
मदनान्वितकुञ्चितकेशयुतं वपुर्गर्वमयं शुभगन्धमयम्।
हृदि भावयुतं शुभप्रेममयं कमनीयकलान्वितकाममयम्॥
अयि नाथ ब्रवीमि नु सत्यमहं मधुरातिमयं माधुर्यमयम्।
अवलोकय............ ॥४॥

गीतमनुवाच्य तस्य नयनयोः सहसाश्रुप्रवाहो भवति। एतस्मिन्समये तस्यानुगमनरताः विप्राः अपि तस्यान्तिकं समायान्ति तान् विलोक्य भीमः सद्य एव अश्रून् अपाकरोति विहसन्निव कथयति।

भीमः - भो विप्राः! चिन्तयामि वारं वारं भवन्तः मम दीर्घशरीरत्वेन ममानुगमने वा मम समानान्तरे चलने सर्वथा असमर्थाः भवन्ति अत्र नास्ति मम कोऽपि दोषः। विधिना मह्यं शरीरमेव एतादृशं प्रदत्तं येन क्वचित् लाभः भवति काचिच्च 'हानिः, पुनः सर्वेषां विप्राणां मुखाकृतिमवलोक्य'

भो:! परिश्रान्ता भवन्तः मास्तु चिन्ता, इतः लधियानद्यास्तटं दृश्यते तदनु नातिदूरे एला-सुवेलयोः संगमश्च दृश्यते अतः अस्माभिः झटिति गत्वा संगमे स्नात्वा विगतश्रमैः भवितव्यम्।

एकविप्रः - भो! भो! ममोदरे तु मूषकाः कूर्दन्ति।

भीमः - भो विप्र! चिन्तया अलम्। तत्र स्नात्वा बुभुक्षामवलम्ब्य चिन्तयामः। सर्वे वेगेन चलन्ति त्वरितमेव लधियेति नदीं तीर्त्वा ऐला-सुवेलयोः संगमे प्राप्नुवन्ति। तत्रैकं मठं विलोक्य प्रसन्नः भीमः कथयति।

भीमः - भो विप्राः! अत्र मठप्राङ्गणे कश्चित् सिद्धपुरुषः दृश्यते अतः तस्यान्तिकं गत्वाहं बुभुक्षायाः शान्त्यर्थमुपायं तथा चात्रत्यानां तीर्थानां विषये च ज्ञानस्योपायं करिष्ये।

सर्वे विप्राः - आम् आम्, शोभनं शोभनम्। इति वदन्तो मठं प्रति गच्छन्ति। सिद्धोऽपि विप्रैः सह भीमम् अवलोक्य ससम्भ्रमो भवति। स्वासनाच्चोत्थाय कथयति।

सिद्धः - भो विप्राः! इदानीं भवन्तः कुतः आयान्ति कुत्र गच्छन्ति च। भीमसदृशो महाबली अयं पुरुषश्च कः?

भीमः - भो सिद्धपुरुष! सत्यं हि भवतां वचः प्रणमत्येषः पाण्डुपुत्रो भीमः।

सिद्धपुरुषः - दीर्घायुर्भव वत्स! स्वागतं ते। कथय केन प्रकारेणाहं भवतां समेषां स्वागतं विधाय कृतार्थो भवेयम्?

भीमः - महात्मन्! नन्विमेऽनुगामिनः बुभुक्षिताः, चिन्तयामि मां विहाय एतेषां कृते यदि भवतां पार्श्वे किञ्चिदन्नादिकं भवेत्तर्हि............

सिद्धपुरुषः - कथं त्वां विहाय वत्स! जानामि तवौदार्यं मनः स्थितिञ्च। सम्भवतः त्वया चिन्तितं यत् भीमाय बहु अन्नमपेक्ष्यते अनेन त्वया .... मां विहाय इति भणितः। वत्स! चिन्ता मास्तु अयं कैलासमार्गः खलु। अनेनाहर्निशं बहवो यात्रिणः कैलास-मानससरोवरयोः दर्शनार्थं गच्छन्ति

प्रत्यागच्छन्ति च तेषां विश्रामाय सौकर्यं भवेदिति विचार्य मयाऽत्र प्राचुर्येण अन्नस्य व्यवस्था कृता। यात्रीणां सौविध्यमेव मम परमं तपः।

भीमः – भो सिद्धवर्य! नास्ति कोप्ययमेतादृशो मे भावः अहं तु अत्रत्यप्रकृतिं, स्वादूदकेन सह वनोद्देशे विविधानि पक्वानि फलानि दृष्ट्वा गतश्रमः ज्ञात्वा स्वात्मानं परितोषयामि। यतो हि–

रसाल-जम्बू-कदलीफलानि
पक्वानि सन्त्यत्र सुशोभितानि।
रम्याणि दृश्याणि च भान्ति येन
गतश्रमोऽहं खलु भीमसेनः।।५।।

सिद्धपुरुषः – वत्स! प्रथमं भवन्तः अत्र ऐला-सुवेलायास्संगमे स्नानं कुर्वन्तु, अहं भवतां कृते भोजनस्य व्यवस्थां करोमि।

विप्रगणाः – समीचीनम् उचितं भणन्ति सिद्धवर्याः। (सर्वे स्नानार्थं गच्छन्ति।) आगत्य –

भीमः – सिद्धवर्याः! स्नानेन पवित्रत्वं गता खलु? निवेदयामि किञ्चित् विषयेऽस्मिन् प्रकाश्य अत्रत्यानां तीर्थानां विषये मामवबोधयतु।

सिद्धपुरुषः – वत्स! इयमस्ति ऐला नदी, अस्यास्तटं ब्रह्मणा विरचितम्। पुराणेषूपलभ्यते, पार्वत्या सहितोऽत्र ऐलेश्वरः शिवः सर्वदा विराजते।[1] बहोः कालात्पूर्वमहं दक्षिणप्रदेशात्तपः कर्तुं पर्वतयात्रायामासम्। तदानीं यदाऽहमत्र प्राप्तवान् तदा मयाऽत्र सुतटी-सुवटीति नद्योः सामीप्ये स्वकीया तपःस्थली कृता तदनु अत्रैव शिवशिवां चाराधयन्यात्रिणां सिद्धानां योगिनां विभिन्नानां तापसानां परिचर्यां करोमि। अनेन इतः दूरं यावत् मम भ्रमणं नास्ति तथापि किञ्चित्पश्चिमायां भगवतिवाराहीतः पूर्वस्यां कालीनद्याः तटे जामदग्न्याश्रमं यावत् यानि कान्यपि सिद्धस्थानानि तीर्थस्वरूपाणि सन्ति तेषां विषये सूक्ष्मेण प्रकाशयामि।

---

1. वर्तमाने चल्थी इति स्थानात् स्वाला स्थानं यावत् अत्र वर्णितानि तीर्थानि सन्ति।

भीमः – आम्, शोभनं कथयतु भवान्।

सिद्धपुरुषः – इतः वायव्यां दिशि देवीधुरा इति नामधेयस्थले रत्नमण्डितायाः वाराहीदेव्याः सिद्धपीठम् अस्ति। देव्याः प्रसन्नतायै अत्रत्याः जनाः प्रतिवर्षं श्रावणीपूर्णिमायां परस्परं प्रस्तरप्रहारं कुर्वन्ति। अस्मिन् प्रस्तर-युद्धे युद्धरतानां मानवानां गात्रेभ्यः प्रचुरमात्रात्मकं रक्तं प्रवहति। वैशिष्ट्यं यत् न कोऽप्यत्र मृत्युं याति[1] अपितु देव्याः प्रति तस्य भक्तिः दृढा भवति।

भीमः – क्षणं विरमन्तु भवन्तः मनसाऽहं देव्याः स्मरणं करोमि प्रणमामि च।

वाराही वरदायिनी भगवती या तुङ्गसानु-स्थिता
नानारत्नविभूषिता प्रमुदिता याऽऽनन्ददात्री शुभा।
सर्वेभ्यः सुखदायिनी सुसरला श्यामा क्षुधाहारिणी
दुर्गा सा करुणामयी बलमयी विद्यामयी पातु माम्॥६॥

मन्त्रं पठन् भीमो ध्यानमग्नो भवति तदनु सिद्धपुरुषं विलोकयति-

सिद्धपुरुषः – तदनु सुतटीति नद्यास्तटे यस्याः कीर्तिः अत्र लोकभाषायां लधियेति नाम्ना प्रसिद्धा अस्ति। तत्र वाराहीपर्वतस्य उपत्यकायां शिलादेव्याः प्रसिद्धं सिद्धपीठमस्ति। जनाः अत्र षोडषोपचारैः बलिदानैश्च देवीं समर्चयन्ति। अत्रत्या देवी नूनं स्व-भक्तानां मनोभिलाषान्पूरयति इत्यत्र नास्ति सन्देहः। नद्यां मत्स्यानामाधिक्येन ग्रामोऽयं मत्सेन्द्रः इत्यभिधीयते। शिलातः निर्गतं जलं विशिष्टं भवति।

भीमः – पुनः क्षणं विरमन्तु इतः भगवतीं शिलादेवीम् आराधयामि।

[२]अत्यद्भुतां महादेवीं सद्यः सिद्धिप्रदायिनीम्।
नमाम्यहं शिलां देवीं विचित्रां परमेश्वरीम्॥७॥

---

1. अद्यापि अत्र श्रावणीपूर्णिमायां तिथौ 'प्रस्तर वर्णनम्' (लोकभाषायां 'बग्वाल') नामधेयकं मेलापकं जनैः आयोज्यते।
2. लधिया इति नद्याः तटे मछियाड़ इति 'संस्कृते मत्सेन्द्र' नामधेयके ग्रामे शिला देव्या मन्दिरम् अद्यापि अस्ति। देव्याः आराधनेन दर्शनेन च मानवानां भक्तानां मनोकामना पूर्णतां याति। इति विशेषः।

वसन्तीं मत्सेन्द्रे विपुलशुभसौख्ये सुललितां
हसन्तीं मातङ्गीं कृशतनुयुतां प्रस्तरमयीम्।
विभूतिं तां लोके कनकमणिरत्नादिखचितां
शिलादेवीं वन्दे परमसुखदात्रीं भगवतीम्॥८॥

महामायायुक्तां ललित-ललितां सौरभमयीं
सुदिव्यां कल्याणीं बहुविधसुपूज्यां सुरनरैः।
वसन्तीं नद्यायास्सरसजलयुक्तां सुमनसां
शिलादेवीं वन्दे परमसुखदात्रीं भगवतीम्॥९॥

निजेभ्यः भक्तेभ्यः विपुलधनदात्रीमनुपमां
शिवाङ्गीं गौराङ्गीं मधुर-मधुभोगान्विदधतीम्
बलिष्ठां धर्मिष्ठां सकलरसदात्रीं रसमयीं
शिलादेवीं वन्दे परमसुखदात्रीं भगवतीम्॥१०॥

न मे शक्तिर्मातः किल तव गुणानां कलनये
न मे ज्ञानं भक्तिः न च लगति ध्याने मम मतिः।
अपर्णे हे मह्यं वितर शुभदृष्टिं करुणया
यया शुद्धो भूत्वा भगवति सदा त्वां हृदि भजे॥११॥

ध्यानमुद्रया इति संस्तुत्य सिद्धपुरुषं विलोकयति।

सिद्धपुरुषः - वत्स! समक्षे या लधिया नदी दृश्यते तस्याः कोशषट्कं यावत् प्रतीच्यां दिशि लधूनेति गिरिश्रृङ्गः विद्यते। तत्रापि लोकभाषायां लधूनेति महादेवः वर्तते। श्रूयतेऽत्र वैद्यनाथात्साक्षाच्छिवः समागत्य भक्तेभ्यः वरदायको भवति इति विशेषः।

भीमः - शिवं संस्मृत्य-

लधूनेति गिरिः येन स्वावासेन विमण्डितः।
वन्दे तं देवदेवेशं वैद्यनाथं कृपाकरम्॥

सिद्धपुरुषः - वत्स! या कूर्मपादनिःसृता ऐला नदी वहति सा भगवतः

ऐलेश्वरस्य निरन्तरं जलाभिषेकं करोति यथा काश्यां भगवती भागीरथी। इतः प्राच्यां नैकानि सिद्धतीर्थानि कमठतीर्थं जामदग्न्यतीर्थं परशुरामघट्टश्च प्रसिद्धः। अत्रैव सुवटी-सुतटीति नद्योः संगमे सुतटीशः शङ्करो वसति अत्रैव ब्रह्मतीर्थञ्च। अत्र स्नानेन दानेन च पुण्यं प्राप्नोति, पिण्डदानेन तर्पणादिकेन च पितृणामपि उद्धारो भवति। अत्रैव नातिदूरे वाण्याः दोषापहारको विद्याधरतीर्थं गन्धर्वतीर्थञ्च।

एकः सिद्धपुरुषस्य सेवकः - भगवन्! यात्रीणां कृते भोजनं सिद्धम्। सर्वे भोजनालये समागच्छन्तु, स्वागतं भवताम्।

भीमः - भो विप्राः! भवन्तः भोजनं कुर्वन्तु। अहं तु कार्यस्यावसाने एव आहारं करिष्यामि। भोजनान्ते भवन्तः यथेष्टं गच्छन्तु वा ममागमनसन्देशस्य प्रतीक्षां कुर्वन्तु। मार्गनिर्देशनाय सर्वेषां कृतज्ञोऽस्मि साम्प्रतम्।

॥ इति चतुर्थोऽङ्कः॥

पञ्चमोऽङ्कः

पुनः गदां स्कन्धे निधाय शनैः शनैः पर्वतमारूह्यमानं गगनचुम्बिनं पर्वतं तस्य शोभायमानां दृश्यावलिं चावलोकयन्भीमो दृश्यते।

भीमः – उपरि दृष्टिपातं कुर्वन् अस्मिन्नेव पथि पर्वतशृङ्गात्कोऽपि अवतरन्दृश्यते। शुभसंकेतः प्रतीयते। अत्र सुदूरं यावत् न काऽपि मानवानां वसतिः, सम्भवतः पर्वतस्यापरभागे भविष्यति। तावद्वेगेन चलामि तमुपगम्य लाभ एव भविष्यति। (किञ्चित् क्षणानन्तरम्) अये अयं तु कौपीनेन भष्मालङ्करणेन कमण्डलुधारणेन जटाभिश्च कश्चन् तापसः प्रतीयते किन्नु संन्यासिनः तापसाश्च सदैव प्रणम्याः भवन्ति, अतः तं प्रणम्याशिषः कामये यतो हि

तापसानां प्रभावेण तेषामाशीः स्वरेण च।
सिद्ध्यन्त्येवेह कार्याणि मानवानां सदा भुवि॥१॥

तापसोऽपि स्वसामीप्ये समागच्छन्तं विशालगात्रान्वितं बलवन्तं नृविशेषं दृष्ट्वा भीतभीतो भूत्वा मनसेत्थं विचारयति।

तापसः – अहो! कोऽयं भीमाकृतिर्महापुरुषः, भीमवद्गदां चानीय पर्वतस्योपत्यकातः सवेगेनापरिश्रान्तः सन् शृङ्गं प्रति गच्छति। चिन्तयामि भीमस्त्विदानीं तत्र हस्तिनापुरे भविष्यति। मन्ये मह्यं भयप्रदानाय कोऽपि पिशाचः निर्जनेऽस्मिन् पर्वते स्वकलां प्रदर्शयन् अत्रागच्छति। साम्प्रतं मयाऽपि सावधानतया वर्तितव्यम्। यावत्तापसः स्व मनसि एवं विचारयति तावद्भीमः तस्य चरणयोः निपत्य प्रणमति।

भीमसेनः – भोः संन्यासिन्! पाण्डुसुतोऽहं भीमः भवन्तम् अभिवादये।

संन्यासी – वत्स! लब्धकामो भव। प्रथमं तु त्वां दृष्ट्वा पिशाचं मत्वा भयं प्राप्तवानहम् परमिदानीं प्रसादं खलु लभे। स्वात्मवृत्तेन सह युधिष्ठिरस्य वृत्तं तथा चात्मनः अत्रागमनप्रयोजनं कथय।

भीमसेनः – स्वामिन्! नवराज्ययुताः सर्वे पाण्डवा कुशलिनः एव, परम् ....।

संन्यासी - वत्स! किं परम्।

भीमसेनः - इदानीं घटोत्कचस्य कारणेन किञ्चित् व्यथिताः।

संन्यासी - किं, किं घटोत्कचस्य कारणेन, स तु जयाख्ये संग्रामे वीरगतिं प्राप्तः।

भीमसेनः - आम्! वीरगतिं प्राप्यापि तस्यात्मानं क्वचिदपि स्थानं न प्राप्तम्, अनेन इतस्ततः भ्रमति तस्यात्मा इति तेन स्वप्नसङ्केतेन सूचितम्। अतः साम्प्रतं ज्येष्ठभ्रातुः आज्ञयाऽहं अत्र कूर्माचलेषु यत्र त्रेतायां वीरवरेण हनुमता लङ्कातः रामेण बाणेन कर्तितं शिरः पातितं, पतन्मात्रेण च ब्रह्मणः वरत्वेन तस्य स्थाने विस्तृतः सरोवरः ह्यभूत्, तत्र गत्वा तस्य गण्डस्थलं सन्त्रोट्य नदीं प्रवाह्य घटोत्कचस्य आत्मानं स्थापयितुं गन्तुकामोऽस्मि येन तत्र देवरूपेण पूज्यमानः घटोत्कचः सुचिरं तिष्ठेत्। अत इदानीं भवतां मार्गदर्शनं कामये।

संन्यासी - किञ्चिद्विचार्य, वत्स! अनेन मार्गेण गच्छन्-त्वमचिरमेव धौननामके स्थाने प्राप्स्यसि ततः किञ्चिद्दूरे उन्नते पर्वतशिखरे नवनीतेश्वराभिधेयस्य शिवलिङ्गस्य दर्शनेन सह समग्रकूर्माचलस्य सुदूरं यावत् दर्शनं कर्तुं शक्नोसि।

भीमः - महात्मन्! तदनु किं करणीयं मया?

संन्यासी - वत्स! तत्र प्रथमं मन्थेश्वरं सम्पूज्य त्वया ततः किञ्चित् पूर्वस्यां दिशि सर्वविधरामणीयकं महेन्द्रमिव सुपूज्यं कूर्माचलीयगिरिवराणां नायकमतीवमनोहरं गगनचुम्बिनं क्रान्तीशं नामधेयकं पर्वतं समुपगम्य तस्य वामभागे गिरिजाबिन्दुकयोः संगमे गिरिजाभिधेयके लघुसरोवरे स्नात्वा ततः बकोड़ा[1] इति स्थले गत्वा तत्र स्थितं विरञ्चिनारायणं सुवन्द्य गिरिजादेवीं समाराध्य रुद्रगणैस्सेव्यमानं सभैरवं क्रान्तीश्वरं शिवं सम्प्रार्थ्य ततः तदुत्तरस्यां दिशि गत्वा तत्रस्थितां विशालानाम्न्यां नद्यां स्नात्वा सुधिकादेवीं दिनकरञ्चार्च्य

1. बकोड़ाख्ये स्थले अद्यापि चन्दराज्य समकालीनं वा कन्यूरेति राज्यसमकालीनम् अतीव कलायुक्तं सूर्यप्रतिमा विद्यते।

भीमामखिलतारिणीं चोपास्य ततः हरेश्वरं सम्पूज्य तत्र स्थितं बेतालं भैरवं च सन्तोष्य कुम्भकर्णस्य गण्डस्थलं संत्रोट्य सरोवरं भिनत्तु यदा सरोवरे स्थितं जलं नद्याः माध्यमेन प्रवाहितं भविष्यति तदा गण्डस्थलान्नातिदूरे समुचिते स्थाने घटोत्कचस्य स्थापना कर्त्तव्या। तत्र ये केऽपि मानवेभ्यः हानिकरा नागादयः दुष्टसत्वाः स्युः ते त्वया हन्तव्याः तथा च ये लोकहिताय शुभकराः स्युः तेषां वन्दनं विधाय नागनाथस्य स्थापना विधेया।

भीमः – महात्मन्! इदानीं भवता सम्यग् निर्दिष्टोऽस्मि, अतः भवतां कथनं शिरोधार्य यथारूपं समाचरिष्ये। विलम्बो मा भवेत् अनेन शीघ्रं गमिष्यामि अतः प्रणमामि (चरणयोः निपत्य प्रणमति)।

संन्यासी – वत्स! सर्वदा प्रसन्नतां प्रसारयतु, शङ्करः शंकरोतु ते। तदनु झटिति हरितललितवृक्षैः अभिमण्डितं नवनीतेश्वरमिति नामधेयकं पर्वत-शिखरमुपगम्य उत्तराभिमुखो भूत्वा परितः पर्वतैः परिवृत्तस्य विशालतमसरोवरस्य शोभां विलोयकन् एकस्मिन् शिलाखण्डे उपविशति।

भीमः – 'मनसि एवं विचारयति' 'अहो अस्मिन्सुविस्तृते सरोवरे त्वावयोस्तदानीं नैकधा नौकाविहारः कृतः। स्मरामि तद्दृश्यं यदा नौकायां यौवनावेशेन मया तस्याः प्रेमालिङ्गनं कृतं तदानीं तस्याः दक्षिणकर्णात्सहसा जले निपतितं मणिकुट्टिमस्वर्णाभूषणः मयाऽतिगभीरात् जलाशयात्प्राणपणेन निष्कासितम्, तदा जलाभ्यान्तरात्सकुशलं माम् बहिरागतं दृष्ट्वा भीतमुक्तया तया मम कपोलं चुचुम्ब्य यादृशं परिष्वंगनं कृतं तत्सर्वदाऽविस्मरणीयम् अद्यापि अस्मिन् सरोवरे नौकायां हृदयालिङ्गनं कुर्वतीं तां मनसा स्मरामि

भयाद्विमुक्तामतिकोमलाङ्गीं
सगद्गदां भास्वरदिव्यदेहाम्।
आचुम्ब्य मां स्मेरमुखीं हिडिम्बां
परिष्वजन्तीं मनसा स्मरामि॥२॥

दीर्घं निःश्वस्य हं हो हिडिम्बे! साम्प्रतं यावत् मम हृदये तव वियोगस्य कणिकाऽपि न स्फुरिता परमस्मिन् वर्षे पुत्रस्य मुखात्स्वप्ने तस्य

दुर्गतिं श्रुत्वा मनसि महत्कष्टमनुभूयते, चिन्तयामि जीवनेऽस्मिन् आवाभ्यां किमर्जितम्।

यतो हि-

पित्रार्थे ह्यर्पिता येन प्राणाः पुत्रो धनानि च।
सम्प्राप्यैतादृशं पुत्रमर्जितं किं मया कदा॥३॥

तवापि कीदृशं भाग्यं चिन्तयामि प्रिये सदा।
प्राप्य प्रियं च पुत्रं च पार्श्वे कोऽपि न विद्यते॥४॥

इति ब्रुवन्नुच्चैः रुदति एवं रोदमानो मूर्च्छितो भवति।

(नेपथ्ये) भोः वीरपुङ्गव! कथं मूर्च्छितोऽसि? कथं मूर्च्छितोऽसि। उत्तिष्ठत जाग्रत उद्यमाय कटिबद्धो भव, किल दूरं नास्ति गन्तव्यः।

भीमः - ध्वनिं श्रुत्वा, अये कोऽत्र भोः? कोऽत्र भोः? को माम् आह्वयति, चतुर्षु दिक्षु दृष्टिपातं कृत्वा-अहो अस्मिन् पर्वतशिखिरे तु नवनीतेश्वर-शिवलिङ्गं विहाय न कोऽपि विद्यते। वृक्षेषु पक्षिणस्तु सन्त्येव परं मया या श्रुता सा मानुषी वाग्। किञ्चित् विवेच्य 'मन्ये यत्किमपि श्रुतं तत् मम कल्याणाय एव भवतु' अतो मयापि विलम्बः न करणीयः, शोभनं प्रकृतिदृश्यं विलोक्य अहो कियत्सुन्दरं मनोहारिदृश्यं वर्ततेऽत्र। इतः दृश्यमाणा हिमालयस्य श्वेतपूर्णा पर्वतावलिः कस्य सहृदयस्य मनो न मोहयति। इतः अस्मिन् पर्वतशिखरादाहिमालयं प्रकृतिः नूनं स्वर्गादपि गरीयसी। (पुनः किञ्चित् विचिन्त्य) अहो प्रकृत्याकर्षणमपि माम् मोहयति अतः सर्वं विहाय इदानीं मन्थेश्वरं प्रार्थयामि-

हस्तौ संहतौ कृत्वा

याम्ये यो हि विराजतेऽत्र शुभदः कूर्माचलात्पर्वतात्
भक्तेभ्यः फलदायकोऽस्ति नितरां यस्य स्वभावो मृदुः।
गव्यैः सिञ्चित-मण्डितः सुरवरः सर्वस्वदाता शिवः
पायान्नः भुवनेश्वरः प्रभुवरः मन्थेश्वरः सर्वदा॥५॥

हे मन्थेश्वर! अस्माकं रक्षां कुरु, भक्तानां मनोरथैः सह ममोद्देश्यं सफलय।

एवं तस्य दृष्टिः पुनः विशाले सरोवरे गच्छति। सरोवरं वीक्ष्य-भो सरोवर! चिन्तयामि तव शोभयाऽत्रत्यानां पर्वतानामपि शोभाऽस्ति परं यस्य कुम्भकर्णस्य शिरोभागे त्वं निर्मितोऽसि तस्य तले विभिन्नानि तीर्थानि दीप्तेश्वर, बालीश्वर, तारकेश्वरादि शिवप्रतिमाश्च पिधानीभूताः अतः तान् सर्वान्नुद्घाटितुं त्वां भेत्तुकामोऽस्मि, क्षमस्व माम् अस्य कार्यस्य सम्पादनार्थं तारकेश्वरं भजामि

सर्वाभीष्टप्रदातारं सर्वानन्दप्रदायकम्।
शिवं तं तारकं वन्दे श्रद्धयाऽहं पुनः पुनः॥

भो शिव! इदानीमहं शिवयोगिनः निर्देशानुसारेण अग्रे गच्छामि। इत्यनुवाच्य क्रान्तीश्वरं प्रति गच्छति।

इति पञ्चमोऽङ्कः

षष्ठोऽङ्कः

एवं शनैः शनैः गच्छन्भीमः क्रान्तीश्वरपर्वतशिखरं प्राप्नोति। पर्वतोऽयं पुरा कदाचिद् भगवद्विष्णुना कूर्मावतारसमये कच्छपाकृत्या सनाथीकृतः। अस्य पर्वतस्य सौन्दर्यमपि सर्वथाऽलौकिकम्। पर्वतभूमिं विलोक्य भीमः भूम्या सह परमेश्वरं प्रणमति-

भीमः -

कूर्मावतारसमये विहितां विशुद्धां
भूमिं तदा करुणया शुभभावनाभिः।
देवेन येन परमात्मपदेन नूनं
तस्मै नमामि सततं भवशान्तिहेतोः॥१॥[1]

प्रभो! अद्यापि भवतां चरणयोः निःसृताम्बुधारा भागीरथीव समग्रं कूर्माचलं पुनाति, तव जलैः अत्रत्यैः मानवैः देवानां शिवस्य चाभिषेकः क्रियते। अत्रापि क्रान्तीश्वरस्य सिद्धस्थलम् अत एव क्रान्तीश्वरं प्रणमामि

देवो यः कुरुते निवासमधुरं कूर्माचले पर्वते
वन्द्यः भक्तगणैस्तथा सुरनरैः यज्ञादिकार्यैः शुभैः।
सद्यो यच्छति यः सदा मृदुफलं नूनं जनेभ्यः भुवि
पायान्नः करुणाकरः शुभकरः क्रान्तीश्वरः सर्वदा॥२॥

वारं-वारं शङ्करं प्रणम्य गन्धर्वान्प्रणमति

देवा वसन्ति ये केऽपि गन्धर्वाश्चात्र किन्नराः।
नमस्करोति तान्सर्वान्भीमोऽयं श्रद्धया ननु॥३॥

---

1. स्कन्दपुराणस्य मानसखण्डे वर्णितः अस्ति (मानस खण्ड पृष्ठ सं. 273 चौ. सं. प्रति. वाराणसी)
यथा कूर्मस्वरूपेण देवदेवो जनार्दनः।
तस्थौ अब्दत्रयं विप्रा महेन्द्राद्यैर्निषेवितः।
ततः प्रभृति वै विप्रा कूर्मपादाङ्कितो गिरिः
कूर्माचलेति विख्यातो दशयोजनविस्तृतः
तत्र या सरितः प्रोक्ता कूर्मपादसमुद्भवाः
ताः सर्वा जाह्नवीतुल्या सन्ति वै मुनिसत्तमाः॥

अहो एतावत्पर्यन्ता तापस-निर्दिष्टा मम यात्रा सफलिता इतः परमहं विशालां स्नात्वा दिनकरं सम्प्रार्थ्य झटिति अग्रे गच्छामि।

(दृश्यपरिवर्तनम्)

देवदारुवनमण्डितमतिविशिष्टं पर्वतशिखरं तत्र भीमः अखिलतारिणी-देव्याः समाराधने तत्परो दृश्यते

भीमः -

देवी याऽखिलतारिणी भगवती कूर्माचले संस्थिता
पूज्या या विविधैः मनोरथयुतैः नानामतिर्मानवैः।
देवैश्चापि विमण्डिता गिरिसुता श्रद्धान्वितैः सर्वदा
वन्दे तां भुवनेश्वरीमभयदां सिद्धिप्रदां मातरम्।।४।।

हे देवि! मनसि पुनस्त्वां संस्मृत्य भूयो-भूयः प्रणमामि, हे जगज्जननि! त्वमेव सर्वेषां पालनं करोषि, सर्वेषां मनोभिलाषं पूर्णं करोषि, अतः अहमपि विश्वकल्याणकामनया स्वात्मार्थञ्च त्वामाराधये।

तत्रस्थितां भीमादेव्याः प्रतिमां विलोक्य हे देवि! भीमोऽस्मि सर्वेषां सानुकूलाय त्वामाराधयामि प्रणमामि च।

या भीमा दिव्यरूपा निवसति भवने पर्वते कूर्मकूटे
वन्द्या या विश्वधात्री सकलजनगणैरर्चिताऽराधिता च।
लोकेभ्यः सिद्धिदात्री विशदगुणयुता यास्ति सौम्या विशाला
सा देवी नः प्रसन्ना दिशतु ननु सदा विश्वकल्याणदृष्टिम्।।५।।

एवं भीमस्तुतिं श्रुत्वा भूखण्डं भीत्वा भगवति भीमा अष्टभुजान्वितं दिव्यस्वरूपं धृत्वा भीमं प्रति कथयति-

देवी -

वरं गृहाण भो भद्र प्रीताऽस्मि तव सन्निधौ।
यथेच्छसि नु तत्कर्तुं समर्थाऽस्मीति ज्ञायताम्।।(६)

भीमः – अम्ब! ममात्मजस्य घटोत्कचस्य आत्मानं जगति शान्तिर्नास्ति। इदानीमपि तस्यात्मा पृथिव्यां चान्तरिक्षे इतस्ततः भ्रमति इति स्वप्नसङ्केतेन तेन कथितः अत इदानीमहं भ्रातुः युधिष्ठिरस्य आज्ञया कुम्भकर्णस्य शिरः पतनेन गभीरः सरोवरः तदानीमभवत् तं त्रोटनाय इहागतोऽस्मि। इत्थं सरोवराज्जलं बर्हिर्निष्कास्य तत्र देवरूपे पुत्रस्यात्मानं स्थापयिष्यामि, कार्येऽस्मिन् भवत्याः निर्देशं शुभाशिषञ्च कामये।

देवी – तथास्तु! वत्स! इतः पश्चिमायां विविधपर्वतैर्परिवृत्तः मण्डलाकारः विशालः सरोवरो दृश्यते, प्रथमं इतः पूर्वस्यां दिशि भगवन्तं महेश्वरं निवेदयनीयं यत् हे शिव! यथा ब्रह्मणः कमण्डलात् गंगायाः प्रवाहो भवद्भिः जटासु समाहितः तथैव अस्य सरोवरस्य जलप्रवाहोऽपि भवद्भिः रोधनीयः अन्यथा सहसा निर्गतैः जलैः महत्प्लावनं भविष्यति। इति शिवं सम्प्रार्थ्य ततः कोशत्रयं पश्चिमायां गत्वा कुम्भकर्णस्य गण्डस्थलं स्वगदया सन्त्रोट्य सरोवरस्थं जलमुत्तरस्यां संभेद्य तन्निरुद्धां जलराशिमपि प्रवाहयतु। एवं गण्डस्थलान्निर्गता नदी उत्तरवाहिनी गण्डकी नाम्ना ख्याता भविष्यति, एवञ्च लोहदण्डान्निर्गता लोहावतीति नाम्ना प्रसिद्धा भविष्यति। इत्थं द्वयोः सङ्गमान्ते क्रोशत्रयं दक्षिणस्यां दिशि भूमिं संशोध्य घटोत्कचस्य प्रतिमां विधाय दैवत्वविधानेन प्रतिष्ठापयतु।

किमधिकम्

लोककल्याणसिद्ध्यर्थं देवानां हितकाम्यया।
कुरु वत्स महत्कार्यं शङ्करः शङ्करोतु ते॥(७)

॥ इति षष्ठोऽङ्कः॥

सप्तमोऽङ्कः

मुदितभावान्वितः भीमः रोमाञ्चितः सन् पर्वतात् अधः गच्छन् दृश्यते। मार्गे हरेश्वरेति तीर्थस्थलं सम्प्राप्य मनसा शिवं विचिन्त्य हस्तयोः नाना- विधानि पुष्पाणि संगृह्य शिवाय समर्पयति-

भीमः -

चित्वातिशुभ्राणि मनोहराणि
पुष्पाणि गन्धैरतिशोभनानि।
भावैरनेकैः परिकल्पितानि
हरेश्वरायेति समर्पयामि॥१॥

जानासि हे देव! मदीयचित्तं
लक्ष्यं नवीनं किल सत्यमेकम्।
याञ्चाऽस्ति मे केवलनिर्विशेषा
मनोरथं पूरय मामकीनम्॥२॥

कार्यम्ममैतच्छुभतामुपेत्य
नूनं भवेल्लोकहिताय याचे।
यया धरैषा नवकौमुदीव
सौभाग्यदात्री सुखदा भवेन्नः॥३॥

इति हरेश्वरं प्रणम्य किञ्चित् प्रतीच्यां दिशि चलति एवं गच्छन्पुनस्तस्य मानसे हिडिम्बिकायाः स्मृतिः जायते, प्रमत्तमिव तामुच्चस्वरेण सम्बोधयति।

भीमः - हे हिडिम्बके! माम् पतिं वृणीत्य त्वया किमपि समुचितं न कृतम्। प्रिये! विवाहात्पूर्वं तव केवलमेकमेवाभिलाषः आसीत् यत् तवोदरात्मम सदृशो वीरः पुत्रः उत्पन्नो भवेत्। प्रभुकृपया तव कामना पूर्णस्तु जाता परं दौर्भाग्यात् रणे ....।

अहो अहमपि कीदृशो मन्दभाग्यः खलु जगति पुत्रः पितृणां क्रियादिकं

करोति परमत्र तु सर्वं विपर्ययः। किं करोमि प्रारब्ध एव एतादृशः। अनेनैव तु दिवंगतस्य पुत्रस्यात्मने साम्प्रतं व्यथितोऽस्मि। तस्य शान्त्यर्थं देवत्वप्रदानाय चेदानीमिहागतोऽहम्। त्वामपि आह्वयामि अत्रागत्य गुप्तरूपेण मम साहाय्यं कुरु इति। एवं ब्रुवन्सः कुम्भकर्णस्य गण्डस्थले समागतः तत्र सरोवरस्य निरीक्षणं कृत्वा–

भीमः – अहो! कीदृशः अभेद्योऽस्ति कुम्भकर्णस्य गण्डस्थलम् तथा उत्तरस्यां दिशि पतितः किरीटस्थो लोहदण्डश्च। मया अस्मिन्नेव स्थले गदया सरोवरस्य त्रोटनं कर्त्तव्यम्। तत्र प्रथमं देवतानां पितृणाञ्च वन्दनं करोमि।

ध्यात्वा पितृगणान्सर्वान्देवान्निद्राद‍िकाँस्तथा।
इष्टदेवं नमस्कृत्य सरः संत्रोटयाम्यहम्।।४।।

(सहसा हिडिम्बिकायाः प्राकट्यम्, हिडिम्बिका चरणयोः निपत्य)–स्वामिन् सादरं वन्दे, अहमस्मि भवताऽऽहूता हिडिम्बिका

भीमः – प्रिये! मम सहायतां कुरु। अहमत्र अस्य विस्तृतस्य सरोवरस्य त्रोटनार्थं समुद्यतोऽस्मि।

इत्युक्त्वा हस्ताभ्यां गदामुत्थाप्य वेगेन गण्डस्थले प्रहारं करोति, अनेन तडागे अवरुद्धो जलराशिः नद्याः स्वरूपं धृत्वा प्रवहति तदनु गदया कुम्भकर्णस्य लौहदण्डं त्रोटयति। लौहदण्डादपि जलधारा प्रवहति। द्वयोः नद्योः संगमः सुरम्यं रूपं धारयति। तत्र महान्तं जलराशिं दृष्ट्वा हरेश्वरं पुनः प्रार्थयति।

मनसा चिन्तनं कृत्वा प्रणम्य च पुनः पुनः।
विनयावनतो भूत्वा याचतेऽत्र वृकोदरः।।५।।

समाहिता यथा गङ्गा पुरा जटासु भोश्शिव।
तथैव गण्डकी भूयादत्र लोके शुभावहा।।६।।

मनोरमं सङ्गमं जलधारां च दृष्ट्वा -

भीमः - (मनसि विष्णुं ध्यात्वा) हे अच्युत! पुरा भवतां चरणयोः निःसृता जलधारा अस्य सरोवरस्य जलेषु निपतति इदानीं मया तीर्थानामुदयकामनया रावणानुजस्य गण्डस्थलं संभेद्य यो जलराशिः प्रवाहितः स इतः कूर्माचलीया उत्तरवाहिनी गण्डकी नाम्ना भुवि पापनाशिनी गङ्गेव सर्वदा लोकपावनी भवेदिति प्रार्थये-

यथा गङ्गा यथा गोदा यथा वहति नर्मदा।
तथैवात्र भवेन्नूनं गण्डकी पापनाशिनी॥७॥

उत्तराभिमुखीपुण्या पवित्रा मोक्षदायिनी
गण्डकी सा भवेन्नित्यं सुखसौभाग्यकारिणी॥८॥

सङ्गमोऽयं भवेन्नित्यं लोककल्याणकारकः।
मज्जनाय च पानाय गङ्गायमुनयोरिव॥९॥

भीमः - हिडिम्बां प्रति-

हे हिडिम्बिके! श्वः वा परश्वो यावत् सरोवरेऽवरुद्धो जलराशिः प्रवाहेण रिक्तो भविष्यति तावत्त्वं वेदनिष्ठान्विप्रान् तथा कुत्रापि सपत्नीकं यजमानं चान्वेष्य आनेतुम् अहमितः दक्षिणस्यां दिशि घटोत्कचस्य प्रतिष्ठापनार्थं भूमेः अन्वेषणं करोमीति।

(पटाक्षेपः)

(दृश्यपरिवर्तनम्)

विप्रैः सह सपत्नीको यजमानो दृश्यते। भीमोऽपि अत्र एकस्मिन् शुभासने उपविष्टो दृश्यते। गुप्तरूपेण हिडिम्बाऽपि अत्र विराजते परं जनैः साऽवलोकितुमशक्या। अत्र पूजास्थले गणपतिपीठे गणेशः, षोडशमातृकाः, योगिन्यः, सर्वतोभद्रे विभिन्नाः देवाः, आदित्यादिनवग्रहाः यथाक्रमेण पूजिताः सन्ति। सर्वेषां मध्ये सुशोभितायां वेद्यामुपरि घटोत्कचस्य नवनिर्मिता प्रतिमा विराजते। यजमानः यवाक्षतैः प्रतिमायाः प्राणप्रतिष्ठां करोति। विप्राः समवेतस्वरेण प्रतिष्ठामन्त्रं पठन्ति-

विप्राः-

ॐ एतन्ते देव सवितर्य्यज्ञं प्राहुर्बृहस्पतये
ब्रह्मणे तेन यज्ञमव तेन यज्ञपतिं तेन मामव॥
मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ॐ
समिमं दधातु विश्वेदेवा स इह मादयन्तामों प्रतिष्ठ।

ॐ भूर्भुवः स्वः घटोत्कचस्य प्राणाः इहागच्छन्तु इह तिष्ठन्तु। घटोत्कचस्य सर्वेन्द्रियाणि वाङ्मनस्त्वक् चक्षुः श्रोत्रजिह्वा घ्राण पाणिपाद- पायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा

अस्मै प्राणाः प्रतिष्ठान्तु अस्य प्राणाश्चरन्तु च।
अस्मै देवत्वमर्चायै मामहेति च कश्चन॥

ॐ घटोत्कच देव सुप्रतिष्ठितो वरदो भव ....

विप्राः- इदानीं घटोत्कचस्य ध्यानं कुरु मन्त्रं पठति-

हिडिम्बिकाया हृदयं द्वितीयं
जितेन्द्रियं भीमसुतं प्रवीणम्।
विवेकिनं वीरवरं कृतज्ञं
घटोत्कचं तं शिरसा नमामि॥(१०)

ध्यानार्थे पुष्पं समर्पयामि.......

एवं विधिना विप्राः घटोकचस्य षोडषोपचारैः पूजनं कारयन्ति। पूजान्ते यथेष्टं दक्षिणां स्वीकृत्य विप्राः यथास्थानं गच्छन्ति। सहसा पूजास्थलं जनशून्यं भवति।

वारं वारं भीमः घटोत्कचस्य प्रतिमामवलोकयति एवमवलोकनेन तस्य नयनयोः सहसाश्रुपातो भवति। कण्ठश्चावरुद्धो भवति। उच्छ्वसितवक्षाः सन् शनैः शनैः एवं वदति।

भीमः – 'भो घटोत्कच! तस्मिन् जीवने त्वं ममात्मजः आशीः परमिदानीं ममापि देव एव। अतः देववत्त्वां प्रार्थयामि सर्वदा लोककल्याणं कुरु ये केऽपि देवभावेन तव पूजां करिष्यन्ति तेषां मङ्गलं विधेहि।

अस्मिन्नेव समये सः रुदन्तीं हिडिम्बिकां पश्यति। पश्यन्तोरेव द्वयोः चक्षुभ्यामश्रुधाराः प्रवहन्ति। द्वयोः न कोऽपि किमपि वक्तुं शक्नोति चित्रलिखिताविव द्वयोः स्थितिः। बहुकालानन्तरम् -

भीमः - हा देवि! इत्यनुवाच्य हिडिम्बिकायाः आलिङ्गनं कर्तुमभिलषति। भीमस्य एवं विधाम् अनायासेन प्रस्फुरितां चेष्टां विलोकयन्ती-

हिडिम्बा - देव! आलिङ्गनेन अलम्। पूर्वं भवता आवयोः पुनर्मेलनस्य आलिङ्गनस्य च कृते समयः स्वीकृतः खलु। अत एवेदानीं मोहपाशाद्विमुक्तो भव। उच्चैः रोदमानः असन्तोलितवदनः, अश्रुपरिपूर्णचक्षुर्भीमसेनः।

भीमः - देव! सर्वथा मन्दभाग्योऽस्मि। नूनं त्वया पतित्वेनाऽलङ्कृतोऽहं किं परं मूढेन मया पतिशब्दस्य सुरक्षा कृता-अतः चिन्तयामि-

समर्पितं देवि त्वया मदर्थं
निजं धनं पुत्रवरः पवित्रः।
परं कदाचिन्नु मया त्वदर्थं
सुखं धनं वा हृदयं प्रदत्तम्॥११॥

निभालितं किन्नु मया सुधर्मः
ये नार्थवन्तः पतयः भवन्ति।
पतीति शब्दस्य विवेचनायां
विवेकहीनोऽस्मि विचारयामि॥१२॥

विवाह्यपश्चात्सुनिषेच्य गर्भं
त्यक्ता मया त्वं विपुले वनेऽस्मिन्॥
कृतं मया ब्रूहि विशेषकर्म
येनाऽत्र सन्तोषयुतो भवेयम्॥१३॥

प्रिये! त्वमेव वद, किं त्वया सह मया न्यायाचारो वर्तितः? विवाहकाले मत्कृतः समयः किमुचितमासीत्? सत्यमनेन प्रसङ्गेन तु इदानीमहं पदे-पदे सीदामि।

हिडिम्बा - देव! एवं मा कथय, वस्तुत अत्र न भवतां दोषः न च भवतां परिजनानाम्। सम्भवतः भवान् मम जन्मरहस्यं न जानाति।

भीमः - देवि! कथय किमस्ति तव रहस्यम्?

हिडिम्बा - देव! यद्यप्यहं राक्षसकुले समुत्पन्ना तथापि भाग्यवशाद्देवगुण-सम्पन्नाऽस्मि। अनेन त्रिकालदर्शिनीशक्तिः मयि जन्मान्तराणां माध्यमेन इह जन्मनि अपि सम्प्राप्ता।

भीमः - अनेन किम्?

हिडिम्बा - देव! अनेनैव मया साम्प्रतं यावत् यत्किमपि घटितं तत्सर्वं तदानीमेव ज्ञातं यदाहं, हिडम्बस्याज्ञया भवतां समेषां वधार्थं वृक्षस्य समीपे समागता।

भीमः - देवि! तदानीं त्वया किं किं ज्ञातः।

हिडिम्बा - देव! प्रथमं तु मया भवतां विपत्तीनां विषये आभासः कृतः तदनु भवतां बलं रूपसौन्दर्यञ्चावलोक्य मया रक्षः स्वभावेन भवतां मांसं विहाय भवता पूजनं पतित्वं च स्वीकृतम्। तत्र मयानुभूतं यत् साक्षात् लीलावतारः श्रीकृष्णः भवतां सहायकः, अत एतैः सह सम्बन्धं संयोज्य यथाशक्ति साहाय्यं दातव्यम्। मया चिन्तितमासीत् यत् लोके जनाः भविष्ये यदा यदा श्रीकृष्णस्य चरित्रं स्मरिष्यन्ति तदा-तदा पाण्डवानां स्मरणमपि भविष्यत्येव, पाण्डवानां स्मरणे भवतां प्रसङ्गेन मम कुटुम्बस्य स्मरणं सहजतया भविष्यत्येव। अनेन मया मातुः कुन्तीदेव्याः सह ज्येष्ठः भ्रातुः धर्मराजस्य समक्षे भवन्तं वरयितुं प्रार्थना कृता। किमधिकं जानाति। सर्वं भवान्।

भीमः - देवि! माम्प्राप्तुं त्वया प्रार्थना कृता इत्यहं जानामि, तत्र महासंग्रामेऽपि पुत्रपौत्रेण नैकैः राक्षसैः सह च वारं-वारं त्वयाऽस्माकं साहाय्यं कृतमिति हृदयेन जानामि परं निगूढं तव चरित्रविशेषं ज्ञात्वाऽद्य रोदनं विहाय इदानीं किमपि कर्तुं न शक्नोमि।

यतो हि-

रक्षः कुलेति संज्ञाय त्वं नैव चिन्तिता मया।
रहस्यं ते कथं जाने मूकोऽहं देवि साम्प्रतम्॥१४॥

गान्धर्वविधिना या त्वं परिणीतासि येन वै।
तेनैव रक्षितास्सर्वे जीवामः पाण्डवा वयम्॥१५॥

हिडिम्बा - देव! भणितं मया पूर्वमेव मदर्थे चिन्तां त्यज, शृणु तावन्ममाभिवृत्तम्। बालावस्थायां यदा मम नाम सालकटङ्कटी आसीत् तदातः मम मनसि स्ववंशोद्धारस्य कामना जागृता अनेन रक्षः दोषनिवारणाय स्वभविष्यं च विज्ञाय मया पतित्वेन भवतां वरणं कृतम्।

भीमः - देवि! मां पतिं स्वीकृत्य कथं त्वया वंशोद्धारस्य कामना कृता? अहं तु सामान्यो जनः कुलोद्धारणाय तु हरिरेव समर्थः।

हिडिम्बा - आम्! भवतारणाय हरिस्समर्थः अनेनैव व्याजेन मया भवत्कृपया नैकधा हरेः दर्शनं न कृतम्? तथा च तस्यानुकम्पयाऽमोघशक्त्या घटोत्कचस्य मृत्युः पौत्रेण सह मम वंशजानां समाप्तिः किं मोक्षाय समर्था न?

भीमः - भो मृदुभाषिणि! कथं व्यङ्ग्यं करोषि? किं न जानासि? घटोकचस्य आत्मा तु सद्गतिं विनाऽन्तरिक्षे अशान्तो भूत्वा इतस्ततः भ्रमन्नासीत्। सद्यः तस्या देवत्वेन मया प्रतिष्ठा कृता।

हिडिम्बा - देव! सम्यक् जानामि। इदमपि जानामि यत् तस्यात्माऽत्र पुनः देदीप्यमानास्ति तथा च यावदस्मिनन्तरिक्षे इयं धरा स्थास्यति लोके च यावद् हरेः कथाः भविष्यन्ति यावच्च जनाः जयवार्तान्श्रोष्यन्ति तावत् घटोत्कचस्यात्मा दीपिष्यते तदनु हरेः प्रसादात्हरेः स्वरूपे समविष्टा भविष्यति।

भीमः - विशिष्टैः भावैः प्रसन्नः सन् 'देवि! तव हरिभक्तियुतं ज्ञानमवलोक्य स्तब्धोऽस्मि खलु साम्प्रतम्।

नारीणां ये गुणा लोके वर्णिताः शास्त्रकोविदैः।
ते सर्वे त्वयि राजन्ते ततो धन्यासि वै भुवि॥१६॥

प्रणयात्साम्प्रतं यावदुपकारैरलङ्कृतः।
त्वदीयैर्देवि भीमोऽयं कृतज्ञोऽस्तीति सर्वदा॥१७॥

हिडिम्बा - देव! यद्यपि भवता सर्वदैव सम्मानितेयमकिञ्चना यातुधानी तथाप्यद्य परिपूर्णतां याति मे सौभाग्यम्। पश्य-

धन्यास्ति लोके ननु राक्षसी सा
यस्याः पतिः वीरवरः प्रतापी।
पुत्रः कृतज्ञः खलु देशभक्तः
घटोत्कचो दीव्यति दिव्यरूपः॥१८॥

देव! चिन्तयामि सम्भवतः इदानीं भवतां हृदि एतादृशी भावना आगता स्यात् यत् भार्यात्वेन मया हिडिम्बा सहचारिणी न कृता, अतो निवेदयामि भवतां साहचर्येणैव इहाहं पतिपुत्रवती भूत्वा भार्याधर्माश्रिताऽस्मि। लोकजीवने मानवानां ये केऽपि भोगविहारादयः भवन्ति ते सर्वे ममेच्छानुसारेण भवता पूरितानि।

किमधिकम्-

त्यजन्तु चिन्तां विषये मदीये
त्वहं मुदा सर्वविध-पृथिव्याम्।
रूपं स्मरन्ती भवतामजस्रं
हिताय तिष्ठामि सदा नराणाम्॥१९॥

नेपथ्ये कोलाहलः श्रूयते-

जयतु घटोत्कचः, जयतु घटोत्कचः, जयतु हिडिम्बासुतः जयतु हिडिम्बासुतः।

जयघोषं श्रुत्वा

हिडिम्बिका - देव! कुत एष ध्वनिः श्रूयते?

भीमसेनः - देवि! मम भ्रातरः अत्रागच्छन्ति, अतः तेषां सहगामिनामेषः जयनादः किल।

हिडिम्बा - देव! तर्हि अहमत्र निलीना भवामि अतो मदीयप्रणामाः स्वीकुर्वन्तु।

भीमः - देवि! कथं निलीना भवसि? पाण्डवास्तु त्वां दृष्ट्वातीव प्रसन्ना भविष्यन्ति।

हिडिम्बा - जानामि परं तेषां समक्षं गत्वाहमिदानीं पुनः मोहजाले निबध्ना भविष्यामि अतो भवतामनुज्ञया गुप्तरूपेण द्रौपद्याः सहितं सर्वेषां पाण्डवानां दर्शनेन तुष्टा भविष्यामि।

इत्युक्त्वा भीमसेनस्य चरणयोः निपत्य अन्तरिक्षे अन्तर्धानं भवति। समयेऽस्मिन् जनसमुदायेन सह पाण्डवाः प्रविशन्ति भीमो युधिष्ठिरं प्रणमति। अन्ये पाण्डवाः भीमं नमस्कुर्वन्ति।

युधिष्ठिरः - (साश्रुनयनो भूत्वा) प्रिय भ्राता! पुत्रार्पणाय न मे शब्दाः समर्थाः इदानीम्। अतः

विलोक्य पुत्रं नवदिव्यरूपे
देदीप्यमानं महिमान्वितञ्च।
कृतज्ञभावेन युधिष्ठिरोऽहं
सन्तोषभावं प्रकटीकरोमि॥२०॥

जयत्वसौ वीरवरः धरायां
जनैः सभक्त्यार्चितभूरिभावैः
देवत्वरूपेण सुपूज्यमानो
घटोत्कचो भीमसुतो बलिष्ठः॥२१॥

युधिष्ठिरस्य चक्षुभ्यां निर्गतान्नश्रून्विलोक्य सद्यः तस्य मनोभावं च परिभाव्य अर्जुनः स्वमनसि विचारयति 'अहो भ्रातृवर्याणामश्रुबिन्दवः खलु सर्वान् रोदितुं विवशाः करिष्यन्ति अतः चित्रस्य दृश्यपरिवर्तनमिव मयापि

किमपि करणीयम्।

स्फुटम् - भ्रातृवर्या! मया श्रुतं यत् स्वजीवने घटोत्कचो वनप्रियः आसीत् खलु, अतः तस्य मन्दिर-परिसरे अस्माभिः सर्वत्र वनस्पतयः विशेषेण सारल्येन सुलभ्याः देवदारु-तरवः रोपणीयाः।

सर्वे - तारस्वरेण-आम् आम्, शोभनं शोभनम्।

भीमः - भो अर्जुन! पश्य तत्र गण्डक्याः पारे देव्याः अखिलतारिण्याः पर्वते सद्यः प्रस्फुटिता नव-नवा देवदारुपादपानां सुरम्या आवलिः। अतः ततः समानीय अत्र देवदारुवनराजिः अस्माभिः रचनीया।

सर्वे एकस्वरेण - साधु साधु। झटिति सर्वे जनाः देव्यास्सानुं समुपगम्य ततः लघु-लघु देवदारुपादपान्नादाय सुविस्तृते परिसरे सम्पूर्णे प्रान्ते च मुदा आरोपयन्ति।

हरिद्विभायुक्तं क्षेत्रविशेषं लघुपादपानामावलिं चावलोक्य युधिष्ठिरः-

असौ सुरम्या लघुपादपानां
सौम्यावलिः भाति सुचित्रयुक्ता।
निजं भविष्यं परिभाषयन्ती
प्रतीयते हर्षयुता हि मन्ये॥२२॥

द्रौपदी - आर्यपुत्र! किञ्चित्कालानन्तरमेव अत्रत्या वनराजिः घटोत्कच-वनरूपेण पृथिव्यां नन्दनवनमिव प्रसिद्धा भविष्यतीति नात्र मनागपि सन्देहः।

युधिष्ठिरः - आम् देवि! नन्वियं विष्णुना प्रतिष्ठिता विविधतीर्थमयी भूमिः, अत्रैव सप्तस्वरात्मकः शिवः, तारकेश्वरः, दीप्तेश्वरः, हरेश्वरः, मानसेश्वरः, बालेश्वरः, भोगीश्वरः, ऋषीश्वरः इति सप्तस्वरेषु विभक्तो जनैः पूज्यते। एतेषु काश्चन् स्वराः इतः पूर्वं कुम्भकर्णस्य शिरोभागेन पिधानीकृताः आसन्। इदानीमुत्तरवाहिन्या गण्डक्याः माहात्म्येन अस्या धरायाः गौरवः सुवर्धितः, यतो हि ये केऽपि श्रद्धालवः भक्ताः अत्र

लोहगण्डक्योः सङ्गमे स्नात्वा घटोत्कचस्य दर्शनं विधाय भगवतो मानसेश्वरस्य दर्शनेन सह मानस-सरोवरं प्रति गमिष्यन्ति तेभ्यः महत्पुण्यफलं प्राप्स्यते।

भीमः - भ्रातः! पुनः अस्माभिः तान् शिवलिङ्गान् गर्तात् निष्कास्य विधिवत् संस्थाप्य सम्पूज्य च लोकहिताय समेषां दर्शनाय च प्रतिष्ठापनीयाः

अर्जुनः - हे भ्रातृवर्य! अहं तु चिन्तयामि ये ये वीराः तत्र महाभारते वीरगतिं प्राप्ताः तथा च येषां आत्मानः घटोत्कचमिव भ्रमन्ति तेऽप्यस्माभिः अत्र स्थापनीयाः।

युधिष्ठिरः - आम् श्रुतं मया विज्ञवरस्य मुखात्यत् चम्वादयः नैकेः तात्कालिका वीराः सन्ति तेषाम् आत्मनः स्थितिः अपि घटोत्कचमिव अस्ति। अतः अस्माभिः मिलित्वाऽत्र कूर्माचले नेपाले, गढवाले, हिमालये च गत्वा तत्र तत्र पृथग् पृथग् तेऽपि दैवत्वरूपेण स्थातव्याः येन आप्लवं ते लोकेऽस्मिन् देववत्पूज्यमानाः सन्तः लोके कल्याणकारका एव भविष्यन्ति नात्र सन्देहः।

सर्वे प्रसन्नाः सन् यथेष्टं गच्छन्ति।

॥ इति सप्तमोऽङ्कः॥

[इति कीर्तिवल्लभ 'शाकटायनेति' कविना विरचितं 'घटोत्कच-वनम्- नामधेयकं' नाटकं समाप्तम्]



81-908700-0-9